Vedamitra (107); Ekākṣaranighaṇṭu (107); Bhaṭṭabhāskara (112); S'aṅkarācāryas'iṣya Dramiḍavāmin (113); Vivaraṇa (116); Vācaspati (117); Mahāyogas'āstra (124); Kas'yapasaṃhitā (134); Vāmana (134); Sāṅkhyas'āstra (142); Yogas'āstra (148); S'ākapūṇi (154); Pras'aṃsā (158); Bhāradvājasūtra (163); Anukramaṇikā (163); Vṛddhamanu (164); Vedāntakārikā of Vasiṣṭha (165); Vasiṣṭha (168); Ratnas'āstra (186); Gītā (193); Vṛddhapārās'ara (196); Vṛddhas'aunaka (199).

The Kalpa quoted on the 1st Ṛk, with the prefatory words एतदुक्तं पुष्करोक्ते कल्पे—

मीमांसमानौ जीवेशौ जागरादौ विचिन्तयेत् ।
विश्वोऽहं तैजसो ऽहं च प्राज्ञो ऽहं तुर्य एव च ॥

इति ।

Comment: अध्यात्मविदेवानपेक्ष एवं विचिन्तयेत् नान्य इति पुष्कराभिप्राय: तत्पूर्वग्रन्थालोचनात् ॥ (p. 11).

On p. 55 there is the remark:

प्रव्रज्यास्तु ब्रह्मविद्याधिकारो मा भूदिति विरुद्धं वच: । अस्ति चेत्थमैतिह्यम् । श्रीशंकराचार्य: स्वमात्रे ब्रह्मोपदिष्टवान् । तदर्थं आत्मज्ञानाख्यो ग्रन्थश्च विरचित: ।

P. 84, cited as of Vedamitra:

द्वाभ्यां देवस्य वाच्यं यत्त्रिभिर्लक्ष्यं निजं स्मृतम् ।
जीवस्य वाच्यमेकेन चतुर्भिर्लक्ष्यमुच्यते ॥

P. 113, cited as from S'aṅkarācāryas'iṣya Dramiḍasvāmin:

अप्रयत्नसमाधिस्थो देहमात्रस्थितिक्रिय: ।
आरूढ: स्यात्परानन्दी बाललीलोचितक्रिय: ॥

P. 134, cited as from Vāmana:

न ब्रह्मलोकसंप्राप्तिरहं गृहमृते भवेत् ।
अन्यत्रोक्तं फलं कल्प्यं प्रत्यभिज्ञाफलं यदि ॥
अनारभ्योक्तविद्यानां कर्मसंपत्फलं विदु: ।
प्रणयनाश्रितगोदोहफलं यद्वा पृथक्स्थितम् ॥ इति ।

P. 165, quoted as from the Vedāntakārikā of Vasiṣṭha:

एका मायेशितु: स्याद्विनशनरहितानादिका नापि सा स्या
नु जीवा विद्या अनन्ता: प्रथमविरहिता ब्रह्मबुध्या विनाश्या: ।
ज्ञानी सर्वं विमायां परिहरति यथा सूर्यपार्श्वस्थरात्रि
रज्जो: पार्श्वस्थसर्पं भवति स्वमहतीत्यन्यथा सर्वमुक्ति: ॥ इति ।

Dated 29-4-1929.

Scribal note at the end:

श्रीमता गुरुनाथेन वाराणसीक्षेत्रे संपादितं पत्रात्मकं देवनागरलिपिभि: लिखितं पुस्तकं दृष्ट्वा अडयार् पुस्तकालयार्थं लिखितम् ॥

43. 40. C. 22.

THE NĪTIMAÑJARĪ OF DYĀDVIVEDA

नीतिमञ्जरी—द्याद्विवेदकृता

Paper. 203 folia (marked 2 sq., folio 1 being missing). 9¾″ × 4½″. 8—9 lines in a page. Devanāgarī script. Old. In good condition. Fair large writing.

The work consists of verses with the author's own commentary thereon; each verse gives an ethical maxim illustrated

by a Vedic legend narrated by commenting upon the related Ṛks.

Complete except the 1st folio. Divided into 8 Aṣṭakas.

For this see Sitaram Jayaram Joshi's introduction to his edition of this, Benares, 1933.

Begins: . . . योजनमस्त्येव किं दिवाकरे नमस्कृतेसर्वे देवा नमस्कृता भवन्ति । कुतः । अनुक्रमण्यामेवमुक्तं—

एकैव वा महानात्मारिता स सूर्य इत्याचक्षते । स हि सर्वभूतात्मा । तदुक्तमृषिणा—सूर्य आत्मा जगतस्तस्थुषश्चेति । तद्विभूतयोन्या देवतास्तदप्येतदृचोक्तम्—इन्द्रं मित्रं वरुणमग्निमाहुरिति । तस्माद्दिवाकरनमस्कारोप्युक्त इति । तर्हि पितृपितामहावपहाय मुकुन्दाय नमस्कारो न घटते । घटत एव । कथम् । यस्मादुत्पन्नौ तस्मिन्नमस्कृते तौ नमस्कृतौ भवत इति ।

एकादशप्रकारैस्तु संहितापाठतत्पर ।

इति पूर्वमुक्तं । ते के प्रकाराः । कस्मिन्ग्रन्थे पठिताः । उच्यते । चरणव्यूहे उक्ताः । तत्र ऋग्वेदस्याष्टौ प्रकारा भवन्ति । चर्चाश्रावकश्चर्चकः श्रवणीपारः क्रमपारः क्रमजटः क्रमदण्डश्चेति । एतेष्टौ संहितापदक्रमाश्चेत्येकादशप्रकाराः । यद्यपि तेषां क्रमो नास्ति तथापि चरणव्यूह उक्तं क्रमं वक्ष्याम ऋग्मये ॥

सरस्वतीमहं वन्दे सभाष्या युवदीपिका ।
युवराजस्य मूढस्य मुखं स्थित्वा यया कृता ॥

सरस्वतीं युवराजोहं वन्दे । यया सरस्वत्या सभाष्या युवदीपिका मूढस्य युवराजस्य मुखे स्थित्वा कृता । ग्रन्थकार इष्टदेवतां नमस्कृत्य वेदांतदृष्टांतेन ग्रन्थस्यारम्भं करोति । ब्राह्मणस्य केन प्रकारेण हरिस्तुष्यतीत्याह—

अग्निहोत्रेण यज्ञेन हरिस्तुष्येद्द्विजन्मनः ।
तुष्टावादौ मधुछन्दा वेदारंभे हविर्भुजम् ॥

द्विजन्मनो ब्राह्मणस्य अग्निहोत्रादिहविर्यज्ञैर्यज्ञेन ज्योतिष्टोमादिः सोमयज्ञैर्हरिस्तुष्येत् । तत्र हेतुमाह । यतः कारणात् सर्वा देवांस्त्यत्का मधुछंदा वेदारम्भे आदौ हविर्भुजमग्निं तुष्टाव । अग्निमीळ इति । सामगानामग्न आयाहीति । तथा ऋग्विधाने ऋष्यश्रृङ्गेनैवमुक्तं अप्स्वग्नौ हृदय इत्युपक्रम्य—

अग्नौ क्रियावतां देवो दिवि देवो मनीषिणां ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥

अग्नौ केन पूज्य इत्याह । हविषाग्नौ जले पुष्पैरिति । भगवान्वेदपुरुषो दृष्टांतमाह । अग्निमीळे पुरोहितं संहिताकारः । अग्निं ईळे । पुरः । हितं । इमानि पदानि । इग्निमीळे । ईळे पुरोहितं । अयं क्रमः । क्रमस्य लक्षणं शौनकेनोक्तं ।

क्रमो द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः ।
उत्तरेणोपसंदध्यात्तथार्धर्चं समापयेत् ॥

इति । तथा अवगृह्या एपति क्रमेत्यादाववग्रहस्य समासांस्तु पुनर्वचन इं गयेदिति पुनर्वचने खंडनं । अर्द्धर्चा पश्चेन्यर्द्धर्चा तस्य परिग्रहः । तर्हि रत्नधातममिति परिग्रहे क्रियमाणे स्वरितादनुदात्तानामिति रेफस्य प्रचयत्वं कस्मान्न प्राप्नोति । उच्यते । परिग्रहे त्वनार्षातादिति निषेधः । चर्चादीनां प्रकाराणां लक्षणं दर्शयति । स्वकीयानि पदानि गृहीत्वा यदा गच्छति तदा चर्चा नाम चतुर्थः प्रकारो भवति । उदाहरणं—अग्निं । पुरः २ हितं । देवं । होतारं । एष चर्चाप्रकार स्थितोपस्थितत्वेन ।

पदमुक्ता पदं मुत्का पदमुक्ता पदं तथा ।
एषा चर्चा समाख्याता क्रमेण क्रमचर्चकः ॥

एवं यदा क्रमेण चर्च्यते तदा क्रमचर्चक इति संज्ञकः षष्ठः प्रकारो भवति । उदाहरणं—अग्निमीळे । पुरोहितं यज्ञस्य । यज्ञस्य देवं । ऋत्विजमृत्विजं । रत्नधातममिति रत्नधातमं । अयं चर्चकः षष्ठः । अथ पञ्चमं श्रावकं दर्शयति । अग्निमीळे । अग्निना रयिं । ईळे पुरोहितं । रयिमश्नवत् । पुरोहितं यज्ञस्य । अश्नवत्पोषं । पुरोहितमिति पुरः २ हितं । पोषमेव । यज्ञस्य देवं । एव दिवे दिवे । देवमृत्विजं । दिवे दिव इति दिवे दिवे । ऋत्विजमित्यृत्विजं । यशसं वीरवत्तमं । होतारं रत्नधातमं । वीरवत्तममिति वीरवत्‌ तमं । रत्नधातममिति रत्न० धातमं । अस्य लक्षणमाह ।

समे ऋचौ गृहीत्वा तु रथवच्चलति क्रमः ।
श्रावकं तं विजानीयाच्चतुर्भिर्दण्ड उच्यते ॥

दंण्ड नामैकादशप्रकारः प्रसंगादिहोच्यते । चतुर्भिः संहिता पदक्रमजटाख्यैर्यदाह तदा दंण्डप्रकारो भवति । तद्यथा । उदाहरणं—अग्निमीळे पुरोहितं । अग्निं । ईळे । अग्निमीळे । अग्निमीळ इळेग्निमग्निमीळे । पुरः २ हितं । ईळे पुरोहितं । ईळे पुरोहितं पुरोहितमीळ ईळे पुरोहितं । यज्ञस्य देवमृत्विजं । देवमृत्विजं । देवमृत्विजमृत्विजं देवमृत्विजं । ऋत्विजमित्यृत्विजं । होतारं रत्नधातमं । होतारं । रत्न०धातमं होतारं । रत्नधातमं रत्नधातमं होतारं होतारं रत्नधातमं । रत्नधातममिति रत्नधातमं । अयं दंण्डो नाम एकादशः प्रकारः । उभयं श्रण्वपार क्रमपारः क्रमेणतु ।

उभयपद यदा स्वयमाह तदा श्रवणीपारो नाम सप्तमप्रकारो भवति । कथं । अग्निं । पुरः २ हितं । ईळे । देवं यज्ञस्य । होतारं । ऋत्विजं । रत्न० । धातमं । एष श्रवणीपारः समाप्तः । अष्टमं क्रमपारमाह—अग्निमीळे । पुरोहितं यज्ञस्य । ईळे पुरोहितं । पुरोहितमिति पुरः हितं । देवमृत्विजं । यज्ञस्य देवं । होतारं रत्नधातमं । ऋत्विजमित्यृत्विजं । रत्नधातममिति रत्न०धातमं । अयमष्टमः प्रकारः । वल्याचष्टः समाख्यातो जटः व्याख्यानः पदद्वयम् ।

क्रमवत्क्रमणं कुर्याद्व्युत्क्रमं च पदे पदे ।
स्वरसंधिसमायुक्तमेतद्वल्याश्च लक्षणं ॥

अनेन प्रकारेण चटः प्रकारो भवति नवमः । उदाहरणं—अग्निमीळे । ईळेग्निं । अग्निमीळे । ईळे पुरोहितम् । पुरोहितं यज्ञस्य । यज्ञस्य पुरोहितमीळेग्निं । अग्निमीळे । ईळे पुरोहितं । पुरोहितं यज्ञस्य । यज्ञस्य देवं । देवं यज्ञस्य पुरोहितमीळेग्निं । अग्निमीळे । ईळे पुरोहितं । पुरोहितं यज्ञस्य । यज्ञस्य देवं । देवमृत्विजं । ऋत्विजं देवं यज्ञस्य पुरोहितमीळेग्निं । अग्निमीळे । ईळे पुरोहितं । पुरोहितं यज्ञस्य पुरोहितमिति पुरः १ हितं । यज्ञस्य देवं । देवमृत्विजं । ऋत्विजमित्यृत्विजं । होतारं रत्नधातमं । रत्नं धातमं होतारं । होतारं रत्नधातमं । रत्नधातममिति रत्नधातमं । अयं चटः प्रकारो नवमः ।

पदद्वयमनुक्रम्य व्युत्क्रम्पोत्क्रम्य संधिना ।
यथावत्स्वरसंयुक्तं सा जटेत्यभिधीयते ॥

अनेन लक्षणेन जटाप्रकारो दशमो भवति । अग्निमीळ ईळेग्निमग्निमीळे । इमे एकादशप्रकारास्तेषां पाठक इति ।

ब्राह्मणस्य अग्निहोत्रादिना विष्णुस्तुष्येत् इति यत्पूर्वमुक्तं अस्मिन्नर्थे वेदप्रमाणेनांगीकृत्य अग्नेः प्राधान्यं दर्शयन् गायत्रेण छन्दसाग्निं स्तौति । अग्निमीळ इति ॥

The portion illustrating modes of Vedic recitation, not found in the MS. described below, is probably extraneous; *cf.* Joshi's ed.

Ends :

विना विधिं केशवमीश्वरं वा
न विद्यते वेदकृतो बुधोन्य: ।
अथो बुधेनाथ विचिंत्य शोध्यं
वक्तुं क्षमो वा न यतोल्पबुद्धि: ॥
बिन्दु (श) रशरैकेन संवति दुंदुभौ ।
वत्सरे माघशुक्लादावकरोत् द्या तिथाविमां ॥

अंकानां वामतो गतिरित्युक्तत्वात् बिंदुपंचपंचाकेनां गणितेन संवत्पंचादशपंचाशे वत्सरे दुंदुभिनाम्नि माघशुक्लादौ तिथौ प्रतिपदि द्याद्विवेद इमां नीतिमंजरी सभाष्यामकरोत् ॥ श्री ॥ इति श्रीमद्याद्विवेदकृते नीतिमंजर्याख्ये भाष्येष्टमाष्टक: समाप्त: ॥ शुभं भवतु ॥

Date : संवत १७९० शक १६५६ मार्गशीर्षकृष्ण ७ गुरौ लिखितं शुभं । श्री ।

भग्नपृष्ठिकटिग्रीवबद्धमुष्टिरधोमुख: ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥

44. 40. C. 23.

Paper. 30 folia. 8½″ × 4½″. 16 lines in a page. Devanāgarī script. Fairly old. In good condition. Small fair writing.

Aṣṭaka I.

At the end : इति श्रीभुवनेश्वर्यै नम: । संवत् १७९१ श्रीमच्छालिवाहनशाके १६१६ प्रवर्तमाने ज्येष्ठकृष्ण ३ बुधे लिखितं नागरजातीयं । हरिदेवततत्सुतहरिवल्लभेन लिखितं काश्यां । यादृशं पुस्तकं० ॥

A comparison with the above shows some variant readings.

45. 21. Q. 10.

ṚGVEDAVYĀKHYĀ—ANONYMOUS

ऋग्वेदव्याख्या—अज्ञातकर्तृका

Palm-leaf. 1 folio. 6″ × 1″. 5 lines in a page. Malayāḷam script. Old. In good condition. Beautiful small writing. Inked.

An anonymous commentary on the Ṛgveda, in verse ; the title and the author unknown. There is only the following fragment.

नत्वा श्रीगुरुपादाब्जद्वन्द्वं मन्दधिया मया ।
संक्षेपात् क्रियते व्याख्या पद्यैर्ह्यै ऋचामृज ॥
विहाय विषमं भावं विलोक्यैनां विपश्चित: ।
अनवद्यामवद्यो: क्रियासुरनुकंपया ॥
प्रकाशकस्थितं चाग्रे क्रतो होत्राख्यमृत्विजं ।
सौम्यग्नि सदा यागफलरत्नधराशय: ॥
पूर्वै रृषिभिस्तुत्वा भृग्वाद्यैरधुनातनै: ।
अस्माभिश्चावहत्वग्निस्स यज्ञेस्मिन् दि . . . ॥

This is the last leaf of a S'ikṣā work.

46. 8. F. 52.

THE ṚGVEDABHĀṢYA—ANONYMOUS

ऋग्वेदभाष्यम्—अज्ञातकर्तृकम्

Paper. 71 folia (marked 2—72, the 1st fol. being missing). 13½″ × 4½″. 8 lines in a page. Telugu script. Old. Very fragile and badly injured. Good small writing.

Up to the 1st Ṛk of Varga I. 4. 8. With unaccented text.

A mere paraphrase; looks like an abridgment of Sāyaṇa.

Begins :

कीदृशं रत्नधातमम् । यागफलरूपाणां रत्नानां अतिशयेन धारयितारम् । अग्निः पूर्वेभिरिति । अयमग्निः पूर्वेभिः पुरातनैः भृग्वङ्गिरप्रभृतिभि ऋषिभिः ईड्यः स्तुत्यः । उत अपि च । नूतनैः नवैरस्माभिः स्तुत्यः । सो अग्निस्स्तुतस्सन् इह यज्ञे देवान् आवक्षति आवहतु । अग्निना रयिमिति । योयं होत्रा स्तुतोग्निः तेनाग्निना यजमानो रयिं धनमश्नुवत् प्राप्नोति । कीदृशं रयिं । दिवे दिवे पोषमेव । प्रतिदिनं पुष्यमाणतया वर्धमानमेव । यशसं दानादिना यशोयुक्तम् । वीरवत्तमं पुत्रभृत्यादिवीरपुरुषोपेतं ॥ २ ॥ अग्ने यं यज्ञमिति ॥ हे अग्ने त्वं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः परितः प्राप्तवान् असि । स इत् स एव यज्ञो . . . . नयतु स्वर्गे गच्छति ॥ ४ ॥ अग्निर्होतेति । अयमग्निः देवो देवेभिः अन्यैर्देवैर्हविर्भोजिभिः सह आगम . . . . गच्छतु । कीदृशो अग्निः । होता होमनिष्पादकः । कविक्रतुः क्रान्तप्रज्ञः । सत्यः अनृतरहितः फलमवश . . . र्थः । चित्रश्रवस्तमः । श्रवः कीर्तिः । अतिशयेन विचित्रकीर्तियुक्तः ॥ ५ ॥ १ ॥

इति प्रथमस्य प्रथमे प्रथमो . . . . ।

Ends :

विना पावकेति । हे पावक सर्वस्य शोधक । वरुण अनिष्टवारक सूर्य । त्वं जनान् प्राणिनां । भुरण्यतं धारयन्तं । इमं लोकं । येन चक्षसा प्रकाशेन । अनुपश्यसि । अनुक्रमेण प्रकाशयसि । तं प्रकाशं स्तुम इति शेषः ।

Fol. 75 (*b*) : इति ऋक्प्रथमाष्टकस्य भाष्ये तृतियोऽध्याय: ॥

At the end of almost every Ṛk : वासुदेवाय नमः ॥

47. 9. H. 9.

NIRUKTA—ANONYMOUS

निरुक्तम्—अज्ञातकर्तृकम्

Paper. 90 folia. 14½" × 8½". 20—40 lines in a page. Telugu script. Fairly old. The first 19 sheets in excellent condition; the rest badly injured. Very bad medium writing.

An anonymous running commentary entitled Nirukta, for the first Aṣṭaka of the Ṛgveda; complete. With unaccented text. Consists mainly of extracts from Yāska and Sāyaṇa.

Begins : रत्नधातमं । यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा । यास्कः—अथातोनुक्रमिष्यामोग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयते अङ्गन्नयति संनममानोक्नोपनो भवतीति स्थौलष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेते रकारमादत्ते गकारम(न)क्तेर्वा दहतेर्वा नीःपरस्तस्यैषा भवति ।

अग्निमीळे । अग्निं याचामीळिरध्येषणकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानां धातृतमं . . . . . . । (Nirukta, 7. 4. 1—2).

आवक्षति । वह प्रापणे । उतशब्दो विकल्पार्थोऽप्यत्र समुच्चयार्थः । दिवे दिवे पोषमेव । प्रतिदिनं पुष्यमाणतया वर्धमानमेव ॥

Ends : आनाभ . . मघवन् गां व्वर् . . यमुपास्ते सधमादः स्याम । धनपतिः अतिशयेन स्तुतिभिः

प्रवर्धयिता । नः पुत्रपौत्रादिभिः सह माद्यन्तो भवेम ॥ इति अष्टमोध्यायः । इति प्रथमाष्टकम् ॥

The writing is so bad that it has not been possible to give a longer extract of the concluding portion.

48. 36. E. 15.

THE VEDAMANTRAVYĀKHYĀ—
ANONYMOUS

वेदमन्त्रव्याख्या—अज्ञातकर्तृका

Photograph. 12 folia. 18½″ × 7½″. 12 lines in a page. Beṅgālī script. Modern. In excellent condition. Good medium hand. Unaccented.

An anonymous commentary on the following Mantras.

R. V. X. 190. 1 (no text, but only commentary for this); I. 50. 1; I. 115. 1; III. 62. 1; I. 99. 1; T. A. X. 12. 1; R. V. I. 3. 10; X. 90. 1; VI. 70. 1; T. A. X. 1. 8; R. V. I. 22. 17—21, 16; I. 50. 10; T. A. X. 1. 8; Āsv. S'r. Sū. II. 9. 10; R. V. VIII. 20. 21; Khila IX. 67. 1, 16, 2, 4; IX. 58. 1—4; VIII. 95. 7, 6; S. V. I. 203; R. V. X. 189. 1; I. 50. 4; Ār. Saṃhitā V. 12; R. V. I. 1. 1; T. S. I. 1. 1. 1; S. V. I. 1. 1; A. V. I. 1. 1; R. V. X. 90. 1.

Incomplete.

The commentary on the 1st Mantra:

लक्षणमिति । तत्र प्रलयावसाने सृष्टयारम्भसमये तपसो ऽदृष्टबलात् समुद्रो ऽध्यजायत । किं भूतः समुद्रः । अर्णवः पानीययुक्तः । सकलजगदुत्पत्तिनिमित्तं जलराशिरुत्पन्न इत्यर्थः । तथा च स्मृतिः—

अप एव ससर्जादौ तासु बीजमवासृजत् । इति । किंभूतात्तपसः । अभीद्धात् । अभिः सर्वतोभावे । समृद्धात् लब्धवृद्धेः । प्रलयसमये हि ऋद्धवुलदृष्टं भवति । ततः समुद्रादर्णवात् धाता स्रष्टा अजायत । किं भूतः । मिषतः । प्रकटीभवतो विश्वस्य वशी प्रभुः । महाप्रलये विलुप्तस्य जगतो निर्माणे प्रभुरित्यर्थः । स धाता यथापूर्वं यथाक्रमं सूर्याचन्द्रमसौ अकल्पयत् निर्मितवान् । किं भूतौ । अहोरात्राणि विदधत् । कुर्वाणौ । सूर्य एव हि दिवसं करोति चन्द्रमाश्च रात्रिम् । ततः सूर्यचन्द्रयोरुत्पत्त्यनन्तरं संवत्सरो ऽजायत । सूर्यचन्द्रोत्पत्तौ रात्रिन्दिवविभागकल्पनया संवत्सरसंभवः । अथो अनन्तरम् । दिवं स्वर्गं पृथिवीं महीं अन्तरिक्षमाकाशं स्वः नक्षत्रलोकोपरिस्थं स्वर्गलोकं स एव धाता अकल्पयत् । चराचरात्मकसकललोकं स एव धाता स्रष्टवान् । रात्री इति । रात्रेश्चाजसाविति ङीप् । अर्णव इति । अर्णसो लोपश्च इति मत्वर्थे वः सलोपश्च । विदधिति द्विवचने एकवचनम् । सुपां सुलुगिति लुक् ।

A photograph of MS. 2, Verzeichniss der Indischen Handschriften der Königlichen Universitäts-Bibliothek, Richard Garbe, 1865—1899.

49. 22. H. 30.

THE AITAREYABRĀHMAṆA

ऐतरेयब्राह्मणम्

Palm-leaf. 140 folia. 18½″ × 1½″. 6 lines in a page. Telugu script. Old. Injured. Good medium writing. Uninked.

Complete.

At the end: अथैतस्य समाम्नायस्य अथातो ब्रह्मणः परिमरः । यो ह वै त्रीन्पुरोहिताँस्त्रीन्पुरो-

धातृन्वेद । तदप्येतदृषिणोक्तमग्नेर्वा एष वैश्वानरः । अथातः पुरोधाया एव । एतेन हवा इन्द्रेण महाभिषेकेण दीर्घतमा मामतेजः । एतेन ह वा इन्द्रेण महाभिषेकेणोदमय आत्रेयः । एतेन ह व इन्द्रेण महाभिषेकेण तुरःकामषेयः । इन्द्रियं वा एतस्मिन्लोके यद्दधि । प्राच्यान्त्वा दिशि वसवो देवाः निशसाद धृतव्रतः । अथास्मा औदुम्बरीमासन्दीं सम्भरन्ति । अथ ततो ब्रूयात् । स इच्छेदेवं वित्क्षत्रियं । अथैनं प्राच्यान्दिशि वसवो देवा निशसाद धृतव्रतः । अथात एन्द्रो महाभिषेकः । पर्यूषु प्रधन्व वाजसातये । देवासुरा वा एषु लोकेषु संयेतिरे । अथोदुम्बरशाखामभिप्रत्यवरोहति । अथ यदौदुम्बर्यासन्दी भवति । अथैनमुदुम्बरशाखामन्तर्धायाभिषिञ्चति । व्याघ्रचर्मणा स्तृणाति । अथातः पुनरभिषेकस्यैव । ऐकाहिका होत्राः । तमुष्टुहिया अभिभूत्योजा इति सूक्तम् । जनिष्ठा उग्रः सह सेतुरायेति सूक्तम् । अथातः स्तुतशस्त्रयोरेव । अथातः स्तुतशस्त्रयोश्चत्वारि । अथातः पुनरभिषेकः सप्त । अथात ऐन्द्रस्त्रयः । स य इच्छे नव । अथातः पुरोधाया पञ्च । अथातः स्तुतशस्त्रयोः पयूष्वेतेन ह वा इन्द्रेण महाभिषेकेण तुरः कावषेयोष्टौ । हरिः ओम् ॥ श्रीकृष्णार्पणमस्तु ॥

On an extra leaf at the beginning :

. . क्ष्यमः पूर्वाचार्यक्रमेण एतत्सौर्यं पुरा द्रष्टं शौनकादिभिराचार्यैः पदादिप्रत्यक्षा . . . . । उदुत्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वौ पुत्रः प्रस्कण्व ऋषिः । सूर्यो देवता । जगती छन्दः । सूर्यप्रार्थने विनियोग । चित्रं देवानामिति षळर्चसूक्तस्य कण्वौ पुत्रः प्रस्कण्व ऋषिः । सूर्यो देवता । . . . ती छन्दः । सूर्यप्रार्थने विनियोगः । षष्ठि ऋचार्धर्च स एतासां सौर्याणां सूर्य एव देवता । अन्त्यमेके सूक्तं आत्मनस्तवं मन्यन्ते । . . . . . मिति ध्यातव्यम् । य एतेन सौर्येण सूक्तेन सूर्यमाहरहरुपतिष्ठन्ते धनधान्या बहु . . . . त्म निर्व्याधिवन्त आयुष्यवन्त आरोग्यवन्तो नाद्यवन्तो रयिवन्तो धनवन्तो बलवन्तो बहुपुत्रवन्तः श्रीकामः शान्तिकामो मेधाकामः प्रज्ञाकामः आयुष्काम आरो . . . . कामो न्नाद्यकाम । एवं भास्करस्याराधनं कुर्यात्सदा गृही पापक्षयार्थी व्याधिनाशनार्थी शत्रुनाशनार्थी पुत्रार्थी मोक्षार्थी जीवितार्थी कुर्या वींत सरूपतां स . . . . . . कतामश्नुते नमश्शौनकाय नमश्शौनकाय नमस्परमऋषिभ्यो न्नमप्परमऋषिभ्यः । धिय . . . ।

50. 19. L. 47.

Palm-leaf. 18 folia. 14¾″ × 1¼″. 6 lines in a page. Telugu script. Old. Worm-eaten. Small good writing. Uninked.

Pañcikā I ; complete.

At the end :

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वर ॥

प्रयाजान्मे अनुयाजाँश्च केवलान् । दीर्घायुरस्तु देवाः । प्रजितश्चतस्रः । आग्नेया वै प्रयाजा आग्नेया अनुयाजा इति च ब्राह्मणं छंदो देवता इत्यपरं छंदांसि वै प्रयाजाश्छन्दांस्यनुयाजा इति ब्राह्मणमृतुदेवता इत्यपरमृतू वै प्रयाजा ऋतवोनुयाज इति च ब्राह्मणं पशवो देवता इत्यपरं पशवो वै प्रयाजाः पशवोनुयाजा इति च ब्राह्मणं प्राणदेवता इत्यपरं प्राणा वै प्रयाजा प्राणानुयाजा इति च ब्राह्ममात्मदेवता इत्यपरमात्मा वै प्रायाजा आत्मा वा अनुयाजा इति च ब्राह्मणमाग्नेया इति तु स्थितिर्भक्तिमात्ममितरत्किमर्थं पुनरिदमुच्यते यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायन्— वरिष्यति सा विज्ञायते तां नैतानैकादश स्त्रीसूक्तानि तषां वासिष्ठमात्रेयं वाध्रियश्वं गर्त्यनन्दमिति नाराशंसवन्ति मैधातिथदैर्षितनुसम्प्रेषिकमित्युभयवन्त्यतोन्यानि

तनूनपात्वन्ति तनूनपात्वन्ति ॥ साम्बसदाशिवार्पणमस्तु ॥

51. 19. L. 48.

Palm-leaf. 74 folia. $16\frac{1}{4}'' \times 1\frac{1}{2}''$. 5 lines in a page. Telugu script. Old. Injured. Large fair writing. Inked except the portion from Pañcikā 4.

Pañcikās 1 and 2 complete except the 1st folio which is missing, and Pañcikā 4 to the end of the 2nd Khaṇḍa of the 20th Adhyāya.

The portion of Pañcikā 4 is foliated separately.

52. 22. H. 31.

Palm-leaf. 11 folia. $16\frac{1}{4}'' \times 1\frac{1}{2}''$. 8 lines in a page. Telugu script. Old. Injured. Fair small writing. Uninked.

Pañcikā 8; complete.

53. 38. G. 3.

THE AITAREYABRĀHMAṆAVYĀKHYĀ OF GOVINDASVĀMIN

ऐतरेयब्राह्मणव्याख्या—गोविन्दस्वामिकृता

Paper. 322 folia. $8\frac{1}{4}'' \times 6\frac{1}{2}''$. 14 lines in a page. Devanāgarī script. Modern. In excellent order. Good medium writing.

Complete except a long gap from the 8th section of the 11th Adhyāya to the beginning of the 19th Adhyāya (foll. 114a), a not very long one in the 32nd Adhyāya where there are repeated some of the verses found in the beginning of the work (foll. 254 and 255), and a few small ones dotted here and there. The commentary styled Bhāṣya, Vyākhyā and Vyākhyāna is called Govindasvāmin or Govindasvāminī after the author.

Begins :

येनाधिकार्थेतरशब्दजल्पन
प्रशोकतप्ताम्बुमनःप्रसादिना ।
अदृष्टपूर्वा श्रुतिरभ्यूदीरिता
तमैतरेयं शिरसा नतोस्म्यहम् ॥
सर्वज्ञेनापि यत्कर्तुमशक्यं तत्पुनर्मया ।
अल्पज्ञेनापि सम्मोहाच्छ्रद्धया च चिकीर्ष्यते ॥
आत्मजेनारविन्दाया विष्णोस्सङ्कृतिजन्मना ।
गोविन्देनैतरेयस्य व्याख्यानं क्रियतेधुना ॥
क्वचिद्विधिः प्रशंसा च केषुचिद्विधिरेव च ।
केषुचित्स्तुतिरेव स्यादेवं निन्दानिषेधयोः ॥
ब्राह्मणाम्नायसामर्थ्याद्गवामयनिको विधिः ।
द्वादशाहविधिर्वा स्यात्प्रसङ्गादन्यदुच्यते ॥
यद्वाग्निष्टोम उक्थ्यश्च षोडशीत्यादिकल्पना ।
आचतुर्विंशदित्यस्मात्प्रायणीयो विधीयते ॥
एष एवातिरात्रस्सन्नते तूदयनीयभाक् ।
अग्निष्टोमस्तथोक्थ्यश्च षोडश्यप्यत्र कल्पिता ॥

This introductory section which consists of about 40 verses giving the contents of the Brāhmaṇa, has at the end the colophon : इति ऐतरेयब्राह्मणभाष्ये गोविन्दस्वामिनि भाष्यार्थसङ्ग्रहकारिका समाप्ता ।

Here begins the commentary on the 1st Adhyāya : श्रीरस्तु । प्रथमोध्यायः । अग्निर्वै देवानामवम इत्यादि ।

The work ends : अथ तस्याभिचरतो व्रतमुच्यते। व्रतं हि सङ्कल्पः । स च मानसो व्यापारः । द्विषतः पूर्वमुपविशेदित्येवमादिषु नञो प्रतिषेधार्थता ।

किन्तर्हि तद्व्यतिरिक्ता क्रियाप्रजा . . . . तेषु नोद्यन्तमादित्यमीक्षेतेत्येवमादिषु । आह च न्यायवित्—

ईक्षणव्यतिरिक्ता हि क्रिया तत्राप्यपेक्षिता ।
प्रत्यासन्नेन सङ्कल्पमनिर्गम्य प्रवर्तते ॥

इति न्यायात् समूलं यश्चादित्यमीक्षेतेत्येवमादिषु . . . इत्युक्तं । तिष्ठेतेत्यात्मनेपदं छान्दसं जानीयात् । यदा द्विषांस्तिष्ठन् भवति स्वयमपि तिष्ठन् भवेत् । तदासीने आसीत । जाग्रति जाग्रीयादेव । जागृ निद्राक्षये । प्रबुद्धो भवेदित्यर्थः । अश्ममूर्धाश्मेव सुदृढो यस्य मूर्धा भवति सोममूर्धा । तमसि द्विषन्तं क्षिप्रं स्तृणुते हिनस्तीत्येवं ब्राह्मणं व्याख्यातम् ।

इत्यैतरेयब्राह्मणभाष्ये गोविन्दाचार्यप्रणीते गोविन्दस्वामिनि चत्वारिंशोध्यायः समाप्तः ।

After this there is written the following:

बध्वा मुद्रां करेण त्रिभिरपि नयनैः कापि पश्यत्प्रभात
प्रोन्निद्रांभोजलीलैः किमपि च मनसा वस्तुतत्वं विविञ्चन् ।
पश्चाल्लुम्बैः कपर्दैः क्षणरुचिकपिशैरिन्दुलेखासनाथै-
र्व्याख्याव्यापारशालि प्रदिशतु मनसश्शुद्धिमैशं वपुर्वः ॥

(उपदिष्टो धर्मः प्रतिवेदं) . . . . ।

This verse after the colophon must have been written by the scribe who wrote the original from which this transcript was made.

Colophon to Adhyāya 1: इत्यैतरेयब्राह्मणव्याख्याने गोविन्दस्वामिनि प्रथमोध्यायः समाप्तः ।

To Adhyāya 3: इत्यैतरेयारण्य (probably a scribal mistake) व्याख्याने गोविन्दस्वामिनि तृतीयोध्यायः समाप्तः ।

To Adhyāya 7: इत्यैतरेयब्राह्मणभाष्ये गोविन्दस्वामिनि सप्तमोध्यायः समाप्तः ।

To Adhyāya 30: इत्यैतरेयब्राह्मणव्याख्यायां गोविन्दस्वामिन्यां त्रिंशोध्यायः समाप्तः ।

An introductory stanza gives the subject of each Adhyāya except the 1st, *e.g.*, Adhyāya 2 begins:

प्रायणीया तदङ्गं यत् देवताद्यध्यगीष्महि ।
तथैवोदयनीया च तद्विशेषाश्च कल्पिताः ॥

Adhyāya 3: श्रीः । गोविन्दस्वामिकृतौ ऐतरेयब्राह्मणव्याख्याने तृतीयोध्याय आरभ्यते ।

सोमप्रवहणीरनिमन्थनीया ऋचः पुनः ।
आतिथ्या च तदङ्गानि तृतीयाध्यायचोदनात् ॥

Dated 20-7-1923.

A transcript from a palm-leaf MS. in Malayāḷam script, belonging to the Naḍuvil Maṭham, Trichur, Cochin State.

For this see Prof. Kunhan Raja, Adyar Library Bulletin, Vol. III, Part 1, Manuscripts Notes; Bhagavad Datta, A History of Vedic Literature, Vol. II, pp. 36 and 37.

54. 39. C. 15.

AITAREYABRĀHMAṆAVYĀKHYĀ (SUKHAPRADĀ) OF ṢAḌGURUS'IṢYA

ऐतरेयब्राह्मणव्याख्या(सुखप्रदा)—षड्गुरुशिष्यकृता

Paper. 4 vols. 620 folia. $8\frac{1}{4}'' \times 6\frac{1}{2}''$. 14 lines in a page. Devanāgarī script. Modern. In excellent condition. Fair medium writing.

An elaborate commentary on the Aitareyabrāhmaṇa. The commentator who is well known through his Vedārthadīpikā on Kātyāyana's Sarvānukramaṇikā, edited

by A. A. Macdonell, Anecdota Oxoniensia, 1886, shows an extensive knowledge of Sūtras, Smṛtis, Vyākaraṇa, Chandas, etc.

Vol. I : Adhyāyas 1—10.
,, II : ,, 11—12.
,, III : ,, 13—33.
,, IV : ,, 34—40.

A few small lacunae are marked. Each Adhyāya has at the end a colophon giving the name of the commentator (either as Ṣaḍguru—which is mostly the case—or Ṣaḍguruśiṣya—which is the case sometimes) along with the title of the commentary.

Begins :

महाव्रतञ्चोपनिषद्द्वयञ्च
महाव्रतं सूत्रमासां तृतीयाम् ।
चत्वारिंशं ब्राह्मणं वै चतुर्थी
सूत्रं पञ्चम्यत्र षष्ठी तु गृह्यम् ॥
शाकल्यं स्यात्संहिता सप्तमीति
इत्येतद्वै सप्तविद्यामृताख्यम् ।
दत्तं स्वयं गुरुभिः षड्भिरेतैः
वेदानङ्गोपाङ्गपूर्णास्तु वन्दे ॥
विनायको गुहप्रियो गिरीन्द्रजेशनन्दनः ।
सुरेन्द्रवृन्दवन्दितस्त्रिशूलपाणिरिन्दुभृत् ॥
श्रुतीस्तुगाररक्ष यः स देवकीसुतः प्रभुः ।
समस्तलोकलोचनः स सूर्य इष्टिपुष्टिदः ॥
प्रणीतभारतामृतः पराशरात्मजो मुनिः ।
वरप्रदः स्मिताननः शिवाभियोगिनामकः ॥
इमे हि षट् प्रपान्तु मां सदा नमामि तानहं ।
इमे हि मामयूयुजन्यथाश्रुतं वदेदिति ॥
तदैतरेयिकं महत्प्रवर्त्यते यथामति ।
यथाश्रुतं यथास्मृतं महात्मनां प्रसादतः ॥
महिदासैतरेयर्षिसन्दृष्टं ब्राह्मणन्तु यत् ।
अग्निर्वा इतिहारभ्य स्तृणुते स्तृणुतेन्तिकम् ॥
चत्वारिंशाख्यमध्यायाश्चत्वारिंशदिहेति घण् ।
प्रतायते तस्य वृत्तिः नाम्ना चैषा सुखप्रदा ॥
गोविन्दस्वामिकृष्णादिभाष्यदृष्टार्थभाषिणी ।
नास्या वृत्तेरर्थवत्वमनुक्तार्थोपवर्णनात् ॥

Ends :

अथ तस्य व्रतम् । उच्यत इति शेषः ।
तस्य तत्कारिणो राज्ञश्शास्त्रिको नियमो मतः ।

पूर्वं उपविशेद्यदि तिष्ठन्न मध्ये तिष्ठेतैव । उपवेश आसनं । प्रकाशने तङ् । न द्विषतः पूर्वं संविद्यद्यासीनं मन्येतासीतैव । संवेशः शयनं । न द्विषतः पूर्वः प्रस्वाद्या . . प्रतं मन्येत जागृयादेव । जक्षिभ्यस्तकानुम्नशत जग्रिस तुरिङ्शयक् च । शत्रुचेष्टास्तु गृह्यन्तां चारैः । सञ्चासुते स्फुटम् ।

कुर्वाणस्य व्रतं चैवं ध्रुवश्शत्रुजयो भवेत् ।
इत्याह । अपि ह यद्यस्याश्ममूर्ध्ना द्विषन्भवति क्षिप्रं वैनं स्तृणुते । स्तृञः स्वादिर्लट् । लिङर्थे च । यो राज्ञोस्य द्विषन् भवेत् तस्य . . . . स्यादश्मभिर्निर्मितो दृढम । तमेष स्तृणुते हिंस्याद्राजा विजितशत्रुकः । सर्वस्वं . . . .

इति षड्गुरुशिष्यविरचितायामैतरेयब्राह्मणवृत्तौ सुखप्रदायां चत्वारिंशोध्यायः ॥

On this see Prof. C. Kunhan Raja, Adyar Library Bulletin, Vol. III, Parts II and III, Manuscripts Notes.

55. 39. I. 2.

THE AITAREYABRĀHMAṆABHĀṢYA OF BHAṬṬABHĀSKARA

ऐतरेयब्राह्मणभाष्यम्—भट्टभास्करकृतम्

Paper. 278 folia. $8\frac{1}{4}'' \times 6\frac{1}{2}''$. 14 lines in a page. Devanāgarī script. Modern.

In excellent condition. Fair medium writing.

Contains Adhyāyas 1—14.

The commentary called herein the Ṛgvedabrāhmaṇabhāṣya, is fairly elaborate. Many small lacunae including that of the beginning, are marked.

Begins: . . . . . प्रकृतापेक्षत्वात् सौमिक्यो देवताः परिशंसनभाजोरग्नाविष्णोः प्रधानदेवतामध्यपातिन्यः इति । अत्र चोद्यम्—यस्मादेकादशकपालः पुरोडाशो द्वावग्नाविष्णू । तत्कथम् । कल्पनमनुष्ठानम् । घृतनिर्वापः स्त्रियै पयः शोणितं पुंसः पयो रेतः ब्राह्मणस्येष्टिपूर्वत्वं सोमपूर्वत्वं वा विकल्प . यज्ञनामत्वे तुल्येऽपि हविर्यज्ञविशेषापेक्षया बर्हिश्शब्दः साधारणो द्रष्टव्यः । एषैका दीक्षेति वचनात् अपराप्यस्ति । संवत्सरे हि गर्भस्थाः प्रजायन्त इति मासैः ऋतुभिश्च संवत्सरावयवभूतैः प्रजापतेः सप्तदशत्वं हेमन्तशिशिरयोः समासेन ऋतूनां पञ्चत्वं विद्वत्फलसम्बद्धे क्रतुफले ऽनुवादः ।

यज्ञो वै देवेभ्य इत्यादिसोमयागोऽत्र देवेभ्य उत्क्रान्त उच्यते । इष्टिभिर्दीक्षणीयादिभिः प्राप्तुमैच्छन् आहुतीनां प्रशंसा । आहुतयश्च प्रकृतत्वात् दीक्षाहुतयः (परिगृह्यन्ते । ऊतयः पालयित्र्यः अवतेर्धातोरेतद्रूपं पन्थानं देवताया याः . . . . . . देवताया याः देवता या यासां हि विष्णुः परमो ऽवमः . . . . देवानामित्यादि । ऋषिः प्रोवाच । यदैतरेयकयाचक्षते । इतरस्य ऋषेरपत्यमैतरेयः । शुभ्रादिभ्यश्चेति ढक् ।

केचिदाहुः—इतरा नाम प्रोक्तेषु ब्राह्मणकल्पेष्विति णिनिः । तदन्तात्तदधीते तद्वेदेत्यण् । तस्य प्रोक्ताल्लुगिति लुक् । छन्दोब्राह्मणकर्मचरणात् धर्माम्नाययोरिति तेषामाम्नाये तस्येदमित्यर्थे गोत्रचरणाद्वुञिति वुञ् । केवलानि कर्माणि विधत्ते मन्त्रांश्च विनियुङ्क्ते तत्कर्म ब्राह्मणम् । . . . . अथ य . . . . ।

Ends:

अस्तमयात्प्रभृति मेरोर्दक्षिणगोले रात्रिर्भवति । उत्तरगोले तदानीमहर्वर्तते । उदयात्प्रभृति दक्षिणगोले अहर्भवति । उत्तरगोले तदानीं रात्रिर्वर्तते । एवमहोरात्रयोर्दक्षिणोत्तरभावस्यारंभावसाने परमार्थतो भवतः । . . . . . . खलु सर्वदोद्भूतप्रकाश एव स्वाधिष्ठितं गोलार्धकं प्रकाशयन् प्रदीप इव मेरुं परितः सञ्चरति ॥

अथ यदेनं प्रातरित्यादि पूर्वानुसारेण व्याख्यातप्रायम् । अहरेवाधस्तादित्यादीति विशेषः । एवमुक्तेन प्रकारेण स एष आदित्यो न कदाचन निम्रोचयति अस्तं गच्छति । नाप्युदेति सामर्थ्यादुपलभ्यते . . . . . . यद्वा ऽस्तं गतेन ह्युदेतव्यं निषेधादेव स . . वोदयनिषेध इति भावः । न वै कदाचनेत्यादि । विदुषः फलम् । एतस्य हेति हशब्दश्चार्थे । गतमन्यत् । अध्यायसमाप्तिसूचनार्था द्विरुक्तिः ॥ इति षष्ठः खण्डः ॥

इति भट्टभास्करमिश्रयज्वविरचिते ऋग्वेदब्राह्मणभाष्ये चतुर्दशोध्यायः समाप्तः ॥

Dated 27-4-1930. A note at the end says that the original is from the Govt. Oriental MSS. Library, Madras. On this see Prof. C. Kunhan Raja, Adyar Library Bulletin, Vol. III, Part II, Manuscripts Notes.

56. 10. D. 5.

THE AITAREYABRĀHMAṆABHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

ऐतरेयब्राह्मणभाष्यम् (वेदार्थप्रकाशः)—सायणकृतम्

Paper. 528 folia. 12″ × 5″. 11 lines in a page. Devanāgarī script. Fairly old. In good condition.

Pañcikās 1—8 ; complete.

At the end : लिखितमिदं पुस्तकं राधाकृष्णमिश्रेण काश्यां संवत् शकं १७३१ माघ शुदि १३ ॥ श्री ॥

57. 41. B. 72.

THE KAUṢĪTAKIBRĀHMAṆA

कौषीतकिब्राह्मणम्

Paper. 91 folia (marked 1—99, foll. 22, 23, 24, 36, 37, 61, 93 and 94 being missing). $8\frac{1}{2}'' \times 4''$. 8 lines in a page. Devanāgarī script. Fairly old. Worn and worm-eaten. Large clear writing.

Adhyāyas 1—15.

Begins :

ओं नमो गणेशाय । अस्मिन्वै लोक उभये देवमनुष्या आसुर्स्ते देवाः स्वर्गं लोकं यन्तोग्निमूचुर्स्त्वं नो अस्य लोकस्याध्यक्ष एधीति तानग्निरुवाचाथ यद्वोहं घोरसंस्पर्शतमोस्म्यंनपचायितारो मनुष्याः कथं वस्तद्भविष्यति यन्मनुष्येष्विति ।

Punctuation marks deserve notice.

Post-colophon statement: संवत् १९१९ वर्षे पौषमासकृष्णपक्षे १० दशम्यां तिथौ भृगुदिने ऽद्येह श्रीचंपकपुरे महाराजकुलश्रीजयसिंहविजयराज्य आभ्यंतरनागरजातीययद्वावमूलीयास्तुतबलभद्रप्रमुखाणां ब्राह्मणं पठनार्थं पं. कालिदासेन ब्राह्मणपूर्वार्द्धं लिखितमिति ॥ शुभं भवतु ॥ पं. वीरु आस तय पुजीयानी पोषी ।

The MS. has ळ and छ throughout instead of ड and च्छ respectively.

A comparison with the text published by Lindner, Jena, 1887, shows some variant readings.

The text published under the other name of S'āṅkhāyanabrāhmaṇa in the Ānandās'rama Sanskrit Series.

58. 41. C. 5.

Paper. 97 folia. $9\frac{1}{2}'' \times 4''$. 9 lines in a page. Devanāgarī script. Old. Moth-eaten and injured. Fair large writing.

Adhyāyas 16—30.

A continuation of the previous MS. in probably a different hand. Punctuation marks and the use of ळ and छ instead of ड and च्छ respectively as in the former.

Post-colophon statement : स्वस्ति ॥ संवत् १९६८ वर्षे फाल्गुनवदि ३० अमावास्या बुधेष्विह श्रीवटपद्रेपा—सह श्रीमुदाफरशाहो विजयराज्ये पञ्चकुलप्रतिपत्तौद्भवे नारायणेन स्वगृहे लोकनार्थं लिखितं । तथा पुत्रपौत्राणामध्ययनार्थं कौषीतकिब्राह्मणं लिखि . । कल्याणं भूयात् । लेखकपाठकयोः कल्याणं ।

संभूष्यं सदपत्यवत्परकराद्रक्षं च सत्क्षेत्रवत्
संशोध्यं व्रणितांगवत्प्रतिदिनं वीक्ष्यं च सन्मित्रवत् ।
बध्यं वध्यवदश्लथं च सततं स्मर्यं हरेर्नामवत्
नैवं सीदति पुस्तकं किल सदाप्येतद्गुरूणां वचः ॥

श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीविश्वेश्वराय नमः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

59. 19. O. 2.

THE KAUṢĪTAKIBRĀHMAṆAVYĀKHYĀ (SUKHADĀ OR SADARTHAVIMARS'INĪ) OF UDAYA

कौषीतकिब्रह्मणव्यख्या (सुखदा सदर्थविमर्शिनी वा)—उदयकृता

Palm-leaf. 261 folia. $20\frac{1}{2}'' \times 2''$. 12 lines in a page. Malayāḷam script. Wooden

board at either end. Old. Brittle and injured. Good small writing. Inked.

An extensive and very learned commentary on the Kauṣītakibrāhmaṇa, by Udaya.

According to the author's own statement, he was the son of Nārāyaṇayajvan and Sāvitrī, younger brother of Nārāyaṇa and Kumāra, nephew of Ṛṣi and Parames'vara, and belonged to the Illam of "Mukundamaṅgalam" which is in all probability the modern Maṅgalam, of Brahmakhalagrāma, the present Brahmakkuḷam, near Guruvāyūr, South Malabar. He came of a family which probably was connected with the illustrious Payyūr Bhaṭṭatiris among whom there were some Ṛṣis and Parames'varas. On this see Prof. Kunhan Raja, Payyūr Bhaṭṭatirimār, Keralopahāram, Keralasamājam, Madras, 1940.

Complete except for a small gap in the end of the 28th Adhyāya. The title 'Sadarthavimars'inī' written on the title-slip of the MS. is not found in the body of the commentary wherein it is called Sukhadā and Saukhyadāyinī. The commentary divides the text of the Brāhmaṇa into 3 Das'akas.

There remains only a broken piece of the 1st folio; the beginning of the work wherein the commentator gives some valuable information about himself is thus lost.

Begins :

. . . म् बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् . . . . . . ॥

. . प्यमाणेरनधिगतमभीष्टार्थलब्धि . .
प्रध्वंसोपायमुच्चावचम . . . . . . ।
. . . .
. . . . ॥ श्शब्दराशिः
श्रेयः प्राप्तेर्निदानं यमिह विदुरपेतान्य . .
. . . . प्रजानां
श्रुत्यर्थोसौ कराम्भोरुह इव सुतरां भा . .
. . . . र्थाः . . . .
तत्सम्बन्धिप्रबन्धान्तरनिवहकृतो ये च तेभ्यो न
. . . .
. . तस्तौ भुवि शस्तौ बाष्कळशाकल्यशै
न्द्रो . . . .
श्रीमत् . . . .
. - म्रायात्मा दिनकृदनिश . . .
. . . . कुसुमावलीम्
ब्रह्मक्षेत्राधिनाथत्र . . . .
तोयभिद् . . . .
सुविमलमानसभाजः सुमनोहं साज . . .
. . . संशोध्य साध्या धिया गृहीध्वं ते
मत्सरा गुणलवश्रद्धालवः स्
. . . त्योवन्नापवाद्योस्म्यहमपि लघुधी स्व-
प्रतीतार्थवादी
दवो यत्कुलदेवतं कमलजक्षेत्राधिवासो हरः
यस्य . . . .
. . . . . ळ महीभूषायमानोत्तम
ग्रामोद्भासिमुकुन्दमंगलश . . . . . .
. . . रे । इह तावदग्निहोत्रादीनि सहस्रसंवत्सर-
सत्र . . . . नि समधिगतानि आहुव-
नीये जुहोति गार्ह . . . . त् आहवनीये
प्रदानमित्य . . . . रणाच्च ।
अग्न्याधेयलक्षणक्रियोत्पन्नत्वनिबन्धना चैषामाहवनी-

यादिसंज्ञा नार्थान्तरनिबन्धना । अतदुत्पादितेषु साधनान्तरबुत्पादिषु लौकिकेष्वग्निषु आहवनीयशब्दप्रयोगप्रत्ययानुपलम्भात् । न खलु कश्चिदपि प्रेक्षापूर्वकारी सन्नग्न्यानयननियोगे विधित्सिते सति कदाचिदाहवनीयमाहरेति वा गार्हपत्यमाहरेति वा प्रयुञ्जानो दृश्यते ॥

. . . तथा घटं करोति ओदनं पचतीत्यादि । एवमिहाप्यवगन्तव्याः । केवलकर्मानुष्ठाना मनुष्यशब्देन विवक्ष्यन्ते । भावनाबलादिहैव देवभावमभिप्रेत्य वा देवेशः । श्रूयते खलु मनुष्यावस्थायामेव देवभावस्येव च यजते । इह जन्मनि दैवभावः देवो भूत्वा देवानप्येति इति । उदाहृतश्चैतद्वाक्योक्तेर्थे शाखान्तरीयोर्थवादः । यथा वै मनुष्या एवं देवा अग्र आसन्नित्यादिः । अथ देवानां प्रवृत्तिमाह—देवाः स्वर्गं लोकं यन्तोग्निमूचुरिति । देवाः साधनानुष्ठा स्वावस्था मनुष्यैः सह पृथिव्यामेव वर्तमाना देवीभविष्यन्तो भावनाबलादापन्न . . . . . मनुष्यशरीरारंभकस्याकर्मणो . . . . . ।

Ends :

. . . . . तेन यज्ञसंताने हेतुत्वं . . . प्रशस्तोयमतिप्रैष वा . . . . कौषीतकिर्मुनिराह . . । वाक्यस्याभ्यासोध्यायपरिसमाप्तिं सूचयति . . . . य . . . . ।

हस्तान्तर्वर्तिधात्रीफलसमदशतापादिताम्नायवाणी
सिद्धान्तार्थस्थितिभ्यः शशिविशदयशःशोधिताशावधिभ्यः ।
ध्वस्तान्तेवासिवर्गान्तरविपुलतमःसंहितिभ्यो नतिस्ताद् . . . . ॥
. . . बीजतो यः समुत्थितः ।
पुण्याङ्कुरः प्ररोहः . . . . . ॥
. . . . ।

प्रवृद्धमानः सफलं प्रसूतां प्रसत्तिमग्र्यां प्रथमस्य पुंसः ॥

इत्याचान्तनिजांघ्रिपंकजनमन्मोहांबुधेः श्रीनिधे
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
. . . . . वसितिं कौषीतकिब्राह्मणव्याख्याने विदधत्तृतीयसव . . यं विधिं होतृकैः ॥

सावित्र्यामजनिष्ट यः सुमनसो नारायणाद्यज्वनः
यस्यर्षिः परमेश्वरश्च जगति स्तव्यौ पितृव्यौ सतां ।
त्रय्यन्ताम्बुजषण्डचण्डकिरणश्रीमान्कुमारः सुधी
र्मीमांसार्णवकर्णधारधिषणो नारायण . . . . ॥
श्लाघ्यब्रह्मखलाख्यकेरळमहीभूषायमानोत्तम
ग्रामोद्भासिमुकुंदमङ्गलपदप्रख्यात मु . कसा ।
विद्यामार्गगतागतव्यसनहृन्नार . . . . .
. . न्मेषसहायसंपदुदितव्याख्यानसंप्रीतिना ॥
लक्ष्मीवागस . . . न्दिरनिवासैकान्तभङ्गस्थले
श्रीमत्तातपितृव्यनाम दधता तेनोदयाख्यावता ।
विप्रेन्द्रेण कृते कृते कृशधियां कौषीतकिब्राह्मण
व्याख्याने सुखदे सतामिह दशाध्यायी तृतीया गता ॥

The verses सावित्र्यामजनिष्ट० and तेन ब्रह्मखलाख्य० end each Das'aka.

At the end of the 1st Das'aka, the 2nd quarter of the 1st of these reads :

प्राज्ञो यस्य चतुर्दशस्वपि गता विद्यासु कोटीम्पराम् ।

At the end of the 2nd, the same which has उभौ in lieu of सतां of its 2nd quarter, has for its 2nd half :

वेदान्ताब्जविकासवासरमणिर्विद्वान्कुमाराह्वयः
स्वैरोत्तीर्णगुरूक्तनीतिजलधिर्नारायणश्चाग्रजौ ॥

श्लाघ्य of the 1st quarter of the 2nd, is substituted by तेन at the end of the 1st and 2nd Das'akas.

The verse इत्याचान्त० occurs at the end of each Adhyāya, मूर्च्छालमोहाम्बुधेः being sometimes substituted for नमन्मोहाम्बुधेः श्रीनिधेः of the 1st Pāda, or the Pāda reading इत्याम्नायसरोरुहविकासोद्यत्सहस्रद्युतेः ।

Each Adhyāya begins with the invocatory stanza:

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान्पुमर्थान्नः पुष्णातु पुरुषोत्तमः ॥

Adhyāya 30 has after this an additional one wherein the commentator invokes his Kuladevatā:

प्रपन्नकामार्पणकल्पवल्ली
भवन्ति यस्मिन्विहिताः प्रणामाः ।
स्मरन्प्रणौमि तद्ब्रह्मखलास्पदाया:
पदाब्जमस्मत्कुलदेवतायाः ॥

The contents of each Adhyāya, together with those of the one preceding it, are summarized by a stanza following the invocation, *e.g.*, Adhyāya 2 has at the beginning:

आधानपुनराधानविधिप्रकटितोग्रिमे ।
. ध्याये . द्वितीयेस्मिन्नग्निहोत्रं विधीयते ॥

At the beginning of Adhyāya 30:

एवं तावदनन्तरातिगतवत्यध्याय उच्चैश्रुतिः
होत्रशंसि विधेयकर्म सकलं माध्यंदिनीयं क्रमात् ।
त्रिंशेस्मिन्नथ यत्तृतीयसवने तेषामनुष्ठेयता
मापन्नं प्रकृतौ यथैव विकृतौ तद्वत्कुमुज्जृंभते ॥

60. 39. A. 4.

Paper. 4 vols. 951 folia. 8¼″ × 6½″. 14 lines in a page. Devanāgarī script. Modern. In good condition. Fair medium writing.

Vol. I: Adhyāyas 1—6. The commentary on Khaṇḍas 5 and 6 of Adhyāya 7 is repeated in the last 2 folia.
,, II: Adhyāyas 7—16.
,, III: ,, 17—21, breaking of in Khaṇḍa 21. 4.
,, IV: From Khaṇḍa 21. 4 to Khaṇḍa 30. 8.

The commentary on Adhyāya 28 is incomplete, breaking off in its 9th Khaṇḍa. Some lacuna are marked.

From a note at the end it is known that the original was acquired for the Govt. Oriental MSS. Library, Madras. The first few pages have been collated with some other MS. and the variants noted. The beginning of the work, wanted in the last, is contained here as follows:

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान्नः पुष्णातु पुरुषोत्तमः ॥
प्रत्यक्षाभिप्रमाणै . नधिगतमभीष्टार्थलब्धि . . .
प्रध्वंसोपायमुच्चावचमवगमयन्नर्कवत्सर्वपुंसाम् ।
स्वप्रामाण्यैकभूषो रचयितृपुरुषाभावनिर्धूतदोषो
मानानामुत्तमोसौ जगति विजयते वैदिकः शब्दराशिः ॥

After this there is the scribal remark:

अत्र ग्रन्थपातः ।

Continues:

श्रुतिकमलविकासबालभानुः
श्रितजनकामितदानकामधेनुः ।

मयि निरवधिभक्तिनम्रमूर्ध्नि
स्फुरतु गुरोः करुणाकटाक्षपातः ॥
समुदितगुणदोषक्षीरपाथोविवेक
प्रकटितपटिमानः प्राप्तसत्पक्षपाताः ।
द्विजपरिषदि मुख्यं श्लाघ्यकाब्दिभ्रतस्ते
मयि गुरुकरुणाद्रास्सन्तु विद्वन्मरालाः ॥
श्रीमत्कौषीतकिमुनिमहःपूर्वपृथ्वीधराग्रा-
दुद्यत्सुज्ञाताखितसुकृतिहृद्व्योमसान्द्रान्धकारः ।
विद्वत्पद्माकरसुखकरैरुल्लसद्बो सहस्रै-
राम्नायात्मा दिनकृदनिशं प्रीतये कल्पतां नः ॥
अपौरुषेयत्वं भूषणाय श्रुत्यङ्गना युक्तिसखीसनाथा ।
वयं प्रणीते स्म मुनिवरं तं वृणामि कौषीतकिनामधेयम् ॥
यद्ग्रन्थसूत्रसन्दब्धा श्रुत्यत्रकुसुमावलिः ।
विश्वमामोदयत्युच्चैः तं सुयज्ञमुनिं स्तुमः ॥
सरन्तः सन्ति ये सन्तः सरण्या तत्प्रणीतया ।
अहन्तारहितस्सर्वानहन्ताननिशं भजे ॥
सर्वज्ञाचार्यपादाम्बुजसततसमाराधनध्वस्तमोह
स्थेमा सोमार्धचूडामणिविपुलकृपालब्धचेतोविकासः ।
कुर्वे कौषीतकिब्राह्मणविवृतिमहं केवलं बुद्धिशुद्ध्यै
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु
सन्तोषवन्तः ॥
व्याख्यातारो हि पूर्वेऽप्यखिलमकथ . . .
. . . . ।
. . . . कौषीतकिब्राह्मण
व्याख्याया . . . . ॥
. . . .
दुर्ज्ञानत्वेन किन्तु स्वविदितमुपदेशाध्वना वा
स्वतो वा ।
सत्येवं नापवाद्योप्यहमपि लघुधी स्वप्रतीतार्थवादी
मत्तोप्यज्ञो जनो यो जगति स च भवेदत्र
योग्योधिकारी ॥

इह तावदग्निहोत्रादीनि० ।

Dates :

Vol. I : 10. 3. 1924 ; Vol. II : 23. 2. 1924 ; Vol. III : 23. 9. 1933 ; Vol. IV : 30. 3. 1924.

61.	30. B. 28.

THE AITAREYĀRAṆYAKA

ऐतरेयारण्यकम्

Palm-leaf. 52 folia (marked 7 sq., the first 6 folia being missing) $8\frac{3}{4}'' \times 2''$. 16 lines in a page. Telugu script. Old. Worm-eaten and slightly injured. Fair small writing. Inked.

Begins abruptly in Khaṇḍa 2. 3. 6 and continues to the end of Adhyāya 2. 7.

62.	19. D. 85.

THE AITAREYĀRAṆYAKABHĀṢYA (VEDĀRTHAPRAKĀS'Ā) OF SĀYAṆA

ऐतरेयारण्यकभाष्यम् (वेदार्थप्रकाशः)—सायणकृतम्

Palm-leaf. 29 folia. $17\frac{1}{2}'' \times 1\frac{1}{2}''$. 8 lines in a page. Grantha script. Recent. In good condition. Fair medium hand. Uninked.

Āraṇyaka 5 ; complete.

Supplies some variants to the Bibliotheca Indica ed., 1876.

63.	10. D. 11.

Paper. 291 folia. $12\frac{3}{4}'' \times 4''$. 7 lines in a page. Devanāgarī script. Recent. In excellent condition. Good medium writing. Complete.

Date at the end of Āraṇyaka 1: संवत् १९०६ शके १७७१ सौम्यनाम संवत्सरे अश्वीन कृष्ण ९ सौम्यवासरे समाप्तिमगात् ॥

Date at the end of Āraṇyaka 5: शके १७७१ सौम्यनामसंवत्सरे मार्गषीर्षशुक्ल ७ गुरौ तद्दिनेयं समाप्तः ॥ शुभं भवतु ॥

The MS. contains the following at the beginning of Āraṇyaka 3:

तुरङ्गवदनो दद्यात्तुरङ्गनयनार्चितः ।
उरगाधिपतत्सोमे गिरं गरुडवाहनः ॥

Cf. Ānandāsrama ed., p. 184.

64. 40. B. 59.

THE S'ĀṄKHĀYANĀRAṆYAKA

शाङ्खायनारण्यकम्

Paper. 6 folia. 10″ × 4½″. 12 lines in a page. Devanāgarī script. Old. Injured. Good medium writing.

The 1st and 2nd chapters of the S'āṅkhāyanāraṇyaka; numbered 31 and 32; according to this version, these form the last two Adhyāyas of the S'āṅkhāyanabrāhmaṇa and are named the Mahāvrata.

Colophons: इति महाव्रते प्रथमोध्यायः ॥३१॥ ॥ ३२ ॥ इति महाव्रते द्वितीयोध्यायः समाप्तः ॥ श्रीप्रभुर्विजयतेतराम् ॥

At the end: संवत् १७४९ फाल्गुनकृष्णदशम्यां सोमवासरे शिवदेवेन लिखितम् ।

पं० वामनसुत पं० गङ्गाधर त सुत पं० नाह्वात पं० मा . . . जीत सुत शिवदेवस्येदं पुस्त . . . ।

Punctuation marks divide each Khaṇḍa into short sentences.

For this version see the Catalogue of MSS., Asiatic Society of Bengal, Vol. II, p. 268; Anandāsrama ed. of the S'āṅkhāyanāraṇyaka, Introduction, p. 2.

65. 19. N. 45.

Palm-leaf. 38 folia. 7″ × 1½″. 7 lines in a page. Malayāḷam script. Fairly old. In good condition. Well written in a medium hand. Inked.

Up to the 20th Khaṇḍa of the 6th Adhyāya.

Some leaves are missing.

66. 9. B. 121.

Paper. 41 folia. 8½″ × 3½″. 10 lines in a page. Devanāgarī script. Old. Much worn and discoloured. Legible small writing.

Complete except the first two chapters, *i.e.*, the Mahāvrata portion. The Adhyāyas are numbered 1—5, 8—12; the last three have no numbering after them; *cf.* the printed editions. Adhyāyas numbered 3, 4, 5 and 8 in this MS., *i.e.*, 5—8 of the printed books are usually regarded as constituting the Kauṣītakibrāhmaṇopaniṣad; but according to the version represented by this, all the chapters contained herein form the Upaniṣad:

Colophon: इत्यृग्वेदान्तर्गतशाङ्खायनोपनिषदः समाप्तः ।

Post-colophon statement: संवत् १६६३ वर्षे मार्गशीर्ष वदि १४ गुरौ वंशपुरे वास्तव्यमहारा . कुल श्री उग्रसेन विजय रा . . भ्यन्तर नागरजातीय ताती श्रीभीमसेनेन लिखितम ॥

67. 11. D. 32.

Paper. 1 folio. 8½″ × 4½″. 8 lines in a page. Devanāgarī script. Fairly recent. Fair large writing.

Adhyāyas 13 and 14.

The former has at the end the colophon:

इति आरण्यके षोडशोध्यायः ॥ १६ ॥ शाङ्खायन ॥

and the latter : इत्यारण्यके च . ॥

68. 41. B. 79.

Paper. 44 folia (marked 8—52, foll. 1—7 and 38 being missing). 9½″ × 4″. 8—11 lines in a page. Old. A little worn. Legible large writing.

Begins abruptly in the end of the 2nd Khaṇḍa of the 2nd chapter and continues to the end of the work.

The chapters are numbered 5—18; in this respect agrees with the last but one wherein chapter 13 is numbered 16.

Colophon : इति शाङ्खायनारण्यके अष्टादशोध्यायः । स . घः ।

Post-Colophon statement : संवत् १९४७ वर्षे अद्येह श्रीकाण्वालयग्रामवास्तव्य उपाध्यायत्रिविक्रमसुत उ०वामनेन लिखितमिति । कल्याणमस्तु । शुभं भवतु । श्रीरस्तु । मङ्गलमस्तु । माघमासे शुक्लपक्षे अष्टम्यां तिथौ सोमदिने अद्येह श्रीकाण्वालीवास्तव्य आ०केशवस्य पुत्रपौत्रपठनार्थम् । ब्रह्मार्पणमस्तु । सोमेश्वरः प्रीयताम् । नर्मदा प्रीयताम् । श्रीमहाविष्णु प्रीयताम् । श्रीमहारुद्र प्रीयताम् । श्रीकुबेरेश्वर प्रीयताम् । श्री श्री ।

यदक्षरपरिसंख्यार्कं वेदशास्त्रस्य पुतस्कम् ।
नाककल्पसहस्राणि दाता स्वर्गपुरे वसेत् ।
आर्षेयं यो लिखित्वा तु ब्राह्मणेभ्यः प्रयच्छति ।
पितरस्त . वैकुण्ठे वसन्त्यक्षरसंख्यया ॥ २ ॥
सुवर्णदानं गोदानं भूमिदातं तथैव च ।
नाशयत्याशु पापानि मुच्यते नात्र संशयः ॥ ३ ॥
हेमधूनुधरादी . दातारस्तु ध्वजा भुवि ।
ऊर्ध्वज पुरुषो लोके यस्तु विद्यां प्रयच्छति ॥ ४ ॥
आचार्यकेशवनी पोथी ॥

II. YAJURVEDA

TAITTIRĪYA

69. 8. G. 12.

THE TAITTIRĪYASAṂHITĀ

तैत्तिरीयसंहिता

Paper. 431 folia. 7 vols. (92, 66, 46, 51, 65, 63 and 48 folia respectively). $9\frac{1}{2}'' \times 4''$. 7—9 lines in a page. Devanāgarī script. Fairly old. Slightly worn and discoloured at places. Generally good medium writing.

Kāṇḍas 1—7; complete; each volume contains one Kāṇḍa designated Aṣṭaka in the colophon.

Vol. 1: Accented except foll. 59—77 which being fresh in appearance, are evidently later restorations.

Colophon : हरिः ओम् । इति तैत्तरीयशाखायां प्रथमाष्टकं समाप्तम् ॥

Vol. 2 : In a different hand from Vol. 1. Accented.

Colophon : हरिः ओम् । इति तैत्तिरीयशाखायां द्वितीयाष्टके षष्ठः प्रश्नः । श्रीरस्तु । शुभं भवतु ।

शुभं भवतु । संवत् १७७ शके १९७२ विकृतिनामसंवत्सरे उदगयने शिशिरऋतौ माघमासे शुक्लपक्षे दशम्यां भौमवासरे लिखितं पुस्तकं कृष्णभट खोलापुरस्थस्य ॥

Vol. 3 : In a different hand from the two above . Unaccented.

Colophon : श्रीकाशीविश्वेश्वरार्पणमस्तु । संवित । तृतीयाष्टकः समाप्तः । . त्र शके १६७१ प्रमोदनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे शुक्लपक्षे षष्ठयां भौमवासरे तद्दिने तृतीयाष्टकसंहिता समाप्ता । शुभं भवतु । श्रीरस्तु । लेखकपाठकयोः शुभं भवतु । रामचन्द्र पर. ।

Vol. 4 : In the same hand as Vol. 1. Accented.

Colophon : इति तैत्तिरीयशाखायां संहितायां चतुर्थाष्टकं समाप्तम् ॥ संवत् १७७३ समये चैत्र शुक्लाष्टम्यां तिथौ मन्दवासरे आत्मारामभट्टखानोरी इदं पुस्तकं लिखितम् ॥ शुभमस्तु ॥

Vol. 5 : In the same hand as Vol. 1. Accented. Neither colophon nor date at the end.

Vol. 6 : In the same hand as Vol. 1. Accented.

Colophon : इति तैत्तिरीयशाखायां यजुर्वेदसंहितायां ष . ष्ठकं समाप्तम् ॥ शुभमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥

भाई राम भट्टद्रोणस्य पुस्तकं स्वार्थं परार्थं च । सखाराम भट द्रोण तथदधन ॥

No date.

Vol. 7: Partly accented, the accented part being in the same hand as Vol. 1.

Ends: अश्वस्य योनिः समुद्रः ॥

No date, no name of the scribe.

70. 29. I. 31.

Palm-leaf. 117 folia. 15″ × 1¼″. 7 lines in a page. Grantha script. Wooden board at either end. Fairly recent. A little worm-eaten. Good medium writing. Inked. Unaccented.

Kāṇḍas 1 and 2; complete.

The colophon to Kāṇḍa 1 is in Telugu script. The Pañcāśats also are numbered in Telugu figures.

71. 8. H. 31.

Paper. 38 folia. 15½″ × 5″. 12 lines in a page. Telugu script. Bound in book form. Fairly recent. Back of the cover dilapidated; the first two folia are torn. Well written in a medium hand. Accented.

Kāṇḍa 1; complete.

In Praśnas 5—8 the Udātta is indicated by a circular mark; only it and sometimes also Svarita are marked in Praśnas 6—8, the Anudātta being completely left out. The Pañcāśats are numbered continuously in each Praśna.

Begins: श्रीमहागणाधिपतये नमः । श्रीगुरुभ्यो नमः । श्रीहयग्रीवाय नमः । इषेत्वोर्जेत्वा वायवंस्थोपा·. . . . . . - .

Praśna 4 begins: श्रीगुरुभ्यो नमः । हंरिः ओं । देवासुरास्संयंत्ता आसंन्ते देवा विंजयमुंपयं तोग्नावामं सुसन्यंदथ तेदमुंसो भविष्यति यदिं सो जेष्यंतीति तदग्निर्न्यंकामयत तेनापौक्रामत्तद्देवा विचित्या वरुरुत्समाना अंन्वायंत्तदस्य सहसादिंत्संत सोरोदीद्यदरोंदीत्तद्रुद्रस्यं रुद्रत्वं यदश्वशींयत तत् ॥ १ ॥ रजतंꣳ हिंरण्यमभवत्तंस्माद्रजतंꣳ हिंरण्यमदक्षिण्यंमश्रुजंꣳ हिं यो बर्हिंषि दंदाति पुरांस्य संवत्सरांद्गृहे रुदंति तंस्माद्बर्हिषि नं देंयꣳ सौंग्निंरब्रवीद्भाग्यंसान्यंथ व इदंमिंति पुनराधेयंन्ते केंवलमित्यब्रुवन्नृध्नंवत्खंलु सं इंत्यब्रवीद्यो मद्देवत्यंमग्निंमादंधाता इंति तं पूषां धत्त तेंन ॥ २ ॥

Praśna 6 begins: ओं श्रीगुरुभ्यो नमः । हंरिः ओं । संत्वा सिंचामि यंजुषा प्रजांमांयुर्धंनं च । बृंहस्पंतिप्रसूतो यंजमान ईंहांरिषत् ॥

72. 19. K. 54.

Palm-leaf. 8 folia. 10″ × 1″. Telugu script. Not old. Injured. Fair medium writing. Uninked. Unaccented.

Breaks off in Anuvāka 1. 2. 2.

73. 21. J. 3.

Palm-leaf. 68 folia. 19″ × 1½″. 7 lines in a page. Grantha script. Old. Worm-eaten and injured. Fair medium writing. Inked, the ink getting to fade away in places. Unaccented.

Kāṇḍa 1; complete.

74. 21. J. 5.

Palm-leaf. 43 folia. 17″ × 1½″. 9 lines in a page. Grantha Script. Fairly Old.

Badly worm-eaten and injured. Fair minute hand. Inked except the last folio but two. Unaccented.

Kāṇḍa 1; complete.

A fly-leaf at the beginning contains the names Subrahmaṇya and Nates'a, the latter in a later hand.

75. 21. J. 8.

Palm-leaf. 73 folia. 15″ × 1″. 6 lines in a page. Grantha script. Fairly recent. Slightly worm-eaten. Small beautiful hand. Inked. Unaccented.

Kāṇḍa 1; complete.

At the end: हरि: ओं गुरुचरणारविन्दाभ्यां नम: । शुभमस्तु । सरस्वत्यै नम: । मीनाक्षिसुन्दरेश्वराय नम: ।

Then in Tamil: s'ārvari varṣam puruṭṭās'i māsam 10.

76. 21. J. 20.

Palm-leaf. 60 folia. 15½″ × 1½″. 7 lines in a page. Grantha script. Old. Heavily injured; some leaves missing. Fair medium writing. Uninked. Unaccented.

From Pañcās'at 1. 1. 14. 3 to the end of the Kāṇḍa.

On the reverse of the folio ending Pras'na 7: श्रीमते श्रीमहादेशिकाय नम: ।
श्रीनिवासवीररघुवर्यपर. . . . . ।
. . . . जार्यमुनिभि: गुरुसार्वभौमै: ।
संप्रेक्षितं करुणया परिपूर्णबोधं . . . . . ।
श्रीश्रीनिवासमहादेशिकाय नम: । हरि: ओं ।

After this in Tamil: 51 pañjādi.

77. 21. J. 9.

Palm-leaf. 210 folia. 12½″ × 1¼″. 7—9 lines in a page. Grantha script. Old. A little worm-eaten and injured. In satisfactory condition. Fair small writing. Inked except a few leaves. Unaccented.

Breaks off in Anuvāka 4. 4. 2.

A note in Tamil on fol. 27 ending Pras'na 1. 4 says that the first 4 Pras'nas were written by one Is'varas'āstrin. The next leaf contains on its obverse the mnemonic formulae . . चनस्त . . वस्व आदित्य इन्द्र॰ शुचीरप: परात्रेव स वाचं भूमिलेक: सलेकं, etc.; on the reverse in Tamil: āṇi māsam kṛṣṇa pakṣam das'amī tithi.

andhi māsam s'ukla pakṣam upa amāvāse tithi.

Kāṇḍa 2 ends fol. 136, line 3; the rest of the folio contains some Aṣṭādhyāyī sūtras. There are 5 extra leaves at the end, of which the contents are as follows:

Leaf 1, obverse, very badly scribbled in Kannaḍa:

शुभमस्तु । श्रीगणाधिपतये नम: । चूर्नि: स येष मास वंदव मासरे । आगमिष्यति श्रीमान्व्यास: । तदितैरवधत्वं च चतुराननवरालभ्य सांप्रतिकसमुद्रतसंप्रहारसमाक्रांतदिगंतदंतावळदंतकुंतप्रणविणस्तस . त्रवक्षस्तळपरा । कमलनियां वनवारणा यिव रावण: त्रिलोकीमभियामंन्यु भवदीया यित्यस्मां नु जातकिंचिदभिजाननितती ॥ १ ॥

The reverse contains in Grantha letter-numerals a statement of the number of

Kāṇḍas, Pras'nas, etc., of the Taittirīya-saṃhitā, which is as follows :

सभावकामताजद्धीपाना (रा)· धीरधीरयः ।
जातुजा (का) लमराकाण्डप्रश्नानुपपदाक्षराः ॥

After this there is an account in Tamil as below :

Kāṇḍas : 7.
Pras'nas : 44.
Sargahitai (?) Anuvākas : 651.
Pañcās'ats : 2198

Padas : Twelve thousand nine hundred (after this there is the Grantha vowel 'e'; other letters of the word gone ; the numerical value of धीरधीरयः is 12929 ; the Pāda is short of one syllable, and one digit is wanted ; the number of Padas given here is wrong) nine Padas. This is thus stated in words while the rest are given in figures.

In the preface (p. 7) to his edition of the Taittirīya Saṃhitā, Laxminarasimharya says : " This Sakha consists of 7 Kāṇḍas, 44 Pannams, 621 Anuvākas, 2,196 Panasas, 19,290 Padams, and 2,53,168 syllables ".

2, obverse, in Grantha : श्रीवेदव्या आय न्मः । सᵒहितापुस्तकस्य श्रीरस्तु नस्सन्ततम् । गुरुभ्यो न्मः ।

A note in Kannaḍa on the reverse says that the codex contains 12 works.

3, recto, in Grantha :

सुखजनसुखकारी दुःखिनो दुःखहरी
मदनपुरिविनोदमन्मथा हयग्रदूती ॥ २ ॥
शिशुफणिमोहि पञ्चमो गानभेदं

The verso of this contains in the same script as the recto the following stanza from the Pratāparudriya :

भद्राङ्कौतुकवेदिमागतवतोरन्योन्यमासेदुषोः
THE TAITTIRĪYASAṂHITĀBHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

तैत्तिरीयसंहिताभाष्यम् (वेदार्थप्रकाशः)-सायणकृतम्

Palm-leaf. 38 folia. $16\frac{1}{2}'' \times 1\frac{1}{4}''$. 6 lines in a page. Telugu script. Fairly recent. In pretty good order. Good medium hand. Uninked.

5th and 7th Pras'nas of the 4th Kāṇḍa; complete.

Attributed by a marginal note in Telugu on the obverse of the 1st folio, to Vidyāraṇya.

Colophon: इति श्रीमद्दिव्ययोगींद्रश्रीविद्यार्थमहेश्वरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवरभुक्कमहाराजस्याज्ञापरिमाधविय्ये वेदार्थप्रकाशे यजुस्संहितायां चतुर्थकांडे सप्तमप्रपाठके पंचदशानुवाकः ॥

The original leaf-marks 1—38 are scored off by a later hand which has instead 302 etc.

178. 30. H. 2.

Palm-leaf. 135 folia (marked 135—269). $18\frac{3}{4}'' \times 1\frac{3}{4}''$. 10 lines in a page. Grantha script. Wooden board at either end. Old. A little worm-eaten, but otherwise in good order. Good medium writing. Inked.

Kāṇḍa 2; complete.

A comparison with the text of the Ānandās'rama edition shows some variant readings.

Colophon: इति वेदार्थप्रकाशे यजुस्संहितायां द्वितीय्यकाण्डे षष्ठप्रपाठके द्वादशोनुवाकः । समाप्तश्च द्वितीयकाण्डः ।

179. 30. H. 31.

Palm-leaf. 39 folia. $16\frac{1}{2}'' \times 1\frac{1}{4}''$. Grantha script. Fairly old. Injured. Good small writing. Inked.

The 6th Pras'na of the 4th Kāṇḍa, breaking off in the 6th Pañcās'at of its 9th Anuvāka.

180. 29. K. 27.

Palm-leaf. 77 folia. $15\frac{1}{4}'' \times 1\frac{1}{2}''$. 9 lines in a page. Grantha script. Old. Worm-eaten. Fair small writing. Uninked.

From the end of the 4th Anuvāka of the 2nd Pras'na of the 4th Kāṇḍa to the end of its 3rd Pras'na.

181. 21. J. 45.

Palm-leaf. 135 folia. $16'' \times 1\frac{1}{2}''$. 6 lines in a page. Grantha script. Old, brittle and damaged. 8 leaves missing. Good medium writing. Uninked.

Kāṇḍa 3; incomplete, breaking off in the 1st Pañcās'at of the 5th Anuvāka of the 5th Pras'na.

Colophon : इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुस्संहितायां० ||

182. 9. H. 5.

Paper. 69 folia. $15\frac{1}{4}'' \times 5''$. 13 lines in a page. Telugu script. Bound in book form. Fairly recent. In excellent condition. Good small writing.

Breaks off in the beginning of the 12th Anuvāka of the first Pras'na of the 1st Kāṇḍa.

A comparison with the Ānandās'rama edition shows some variant readings. Begins with वागीशाद्याः सुमनसः etc. and not with गजवदनमचिन्त्यं etc.

A label on the obverse of the 1st folio says that this was presented to the Library by Pandit N. Bashyacharya.

183. 34. F. 21.

Palm-leaf. 142 folia. $16'' \times 1\frac{1}{2}''$. 10 lines in a page. Telugu script. Wooden board at either end. Fairly old. Badly damaged. Good small writing. Uninked.

Kāṇḍa 2; complete.

A note at the end says that the transcription was completed on the 10th of the bright fortnight of Mārgas'īrṣa of Bhāva.

184. 21. J. 35.

Palm-leaf. 140 folia. $16\frac{1}{2}'' \times 1\frac{1}{4}''$. 13 lines in a page. Telugu script. Very old and brittle; slightly worm-eaten; a few leaves broken. Fair minute hand. Uninked except a few leaves.

Kāṇḍa 1; incomplete, breaking off in the 22nd Anuvāka of the 8th Pras'na; foll. 21—53 and 59—104 are missing; and the commentary from the middle of the 3rd Anuvāka to the middle of the 13th Anuvāka of the 1st Pras'na, and from the middle of the 14th Anuvāka of the 1st Pras'na to the end of the 11th Anuvāka of the 3rd Pras'na is lost.

185. 29. K. 19.

Palm-leaf. 81 folia. $16\frac{1}{4}'' \times 1\frac{1}{4}''$. 6 lines in a page. Telugu script. Fairly recent. In good order. Fair medium hand. Uninked.

Kāṇḍa 5; complete except the last few (Viniyogasaṃgraha) Kārikās.

186. 29. C. 37.

Palm-leaf. 121 folia. $16\frac{1}{2}'' \times 1\frac{1}{2}''$. 10 lines in a page. Grantha script. Wooden board at either end. Fairly recent. Slightly worm-eaten. Legible small writing. Uninked.

Kāṇḍa 4 ; complete.

Colophon : इति श्रीमद्दिव्ययोगीन्द्रविद्यातीर्थ-महेश्वरापरावतारस्य श्रीमद्राजाधिराजराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थ . . शे यजुस्संहितायां चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोनुवाकः । समाप्तश्च प्रपाठकः । समाप्तश्च चतुर्थकाण्डम् ॥ हरिः ओं ॥

187. 23. L. 12.

Palm-leaf. 107 folia (numbered 103 sq.) $17'' \times 1\frac{1}{2}''$. 10 lines in a page. Grantha script. Old, fragile, worm-eaten and damaged. Fair medium writing. Inked.

Kāṇḍa 3 ; incomplete, breaking off in the 9th Anuvāka of the 5th Pras'na.

The Anuvāka colophon sometimes ends with रघुनाथाय नमः followed sometimes by महागणपतये नमः and once by हनूमते नमः, all the three Namaskāras being written in Telugu.

188. 20. C. 32.

RUDRAPRAS'NABHĀṢYA (JÑĀNAYAJÑA) OF KAUS'IKA BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम् (ज्ञानयज्ञः)—कौशिकभट्टभास्कर-कृतम्

Palm-leaf. 52 folia. $15\frac{3}{4}'' \times 1\frac{1}{4}''$. 7 lines in a page. Telugu script. Wooden board at either end. Slightly injured. Fairly well written in a medium hand. Uninked.

Complete.

In the colophon at the end the author is surnamed Kās'ikā, evidently an error for his patronym Kaus'ika.

Begins : . . . अविघ्नमस्तु । . . . . अग्नि-कांडमग्न्या . य . . . . । तत्र . . . याग्न्यामिष्टकायां शतरुद्रिय्यं जुहोति । नमस्ते रुद्र मन्यव इति । रुद्रो वा एष यदग्निः । तस्यैते तनुवाविल्यादि । अजक्षीरेण जुहोति । यद्राम्याणां पशूनां पयसा जुहुयादित्यादि ब्राह्मणं । अर्कपर्णेन . . . . . हारानयेति स यत्र धारेष्टकां प्राप्नोति तत्प्रतिपद्य तेन अंगिरसः सुवर्गं लोकं यंतो अजायां इत्यादि ब्राह्मणं । तत्रायं प्रयोगक्रमः । अथैतस्या-र्कपर्ण . . . . . स्राविणं कृत्वा उदङ्मुखस्तिष्ठन् मुखदघ्ने धारयन् नमस्ते रुद्र मन्यव इत्याद्यनुवाकं निगद्य द्वितिय्यं त्रितिय्यं चथुर्थस्यानुवाकस्य यत्राभिजानाति नमः क्षतृ . . . तत्स्वाहाकरोति ।

Colophon to Anuvāka 1 (fol. 13*b*) : इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये श्रीरुद्रप्रश्ने प्रथमोनुवाकः ।

Ends : कापिलेन पयसा अयुतं जुहुयात् । जातिस्मरो जायते ।

Colophon : इति काशिकाभट्टभास्करविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये अग्निकांडे पंचमप्रपाठके श्रीरुद्रप्रश्ने एकादशोनुवाकः । समाप्तः प्रश्नः । श्रीसदाशिवाय नमः ।

शतरुद्रप्रभावेन सर्वमेव यथा तथा ।
एकादशैकादशतो दानमुक्तं मयानघ ॥
सर्वभागकरो होमः कलशस्थापनं तथा ।
शिखास्फुटितसंस्कारमपि निर्वाणकारकं ॥

रुद्रैकादशपूजा च सोमापो सुखसंज्ञिता ।
जातिस्मृतिक्रिया पुंसां पूजा दानं तथैव च ॥
राज्ञामन्यच्च तत्कल्यं सर्वमुक्तमशेषतः ।
श्रीसांबसदाशिवार्पणमस्तु ॥

For this see the Descriptive Catalogue, Government Oriental Manuscripts Library, Madras, Nos. 134, 135 and 137; Eggeling, India Office Catalogue, No. 153; Ānandās'rama ed., 1888.

Contains some variants to the Ānandās'rama edition.

Two extra leaves at the end. One contains the first few lines of Appaya's Madhvamatavidhvaṃsana, a commentary on his Madhvatantramukhamardana. The other, a small broken one, 5½" × ¾", has on its obverse: श्री . परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रम . . . . ष्ठतपश्चक्रवर्ति अनाद्यविछिन्नगुरुपरंप . . . पाव षड्दर्शन . . . . . य वैदुकमार्गप्रवर्तकसर्वतंत्रस्वत . . . . भेदानि विदा . . . . ।

On the reverse: चिरवासरुष्यश्रुंगपुरवराधीश्वर श्रुंगेरि . . रूपाक्षश्रीविद्या . . . . न्महाजनमुल्कु यथोचितसन्मानपूर्वं . . . . . विरचिसं . . . . ।

189. 29. K. 22.

THE RUDRAPRAS'NABHAṢYA (JÑĀNAYAJÑA) OF KAUS'IKA BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम् (ज्ञानयज्ञः)—कौशिकभट्टभास्करकृतम्

Palm-leaf. 54 folia (foll. 111 sq.). 17½" × 1½". 6 or 7 lines in a page. Telugu script. Fairly old. Slightly worm-eaten. Good medium writing. Uninked.

Complete.

Begins:

अर्धनारीश्वरं वंदे क्षुत्पिपासाप्रशांतये ।
व्याधिनाशाय सततं सर्वपापक्षयाय च ॥

अतः परमग्निकाण्डमेव व्याख्येयं । तत्र चरमायामिष्टकायां जुहोति शतरुद्रीयं जुहोति । नमस्ते रुद्र मन्यव इति ।

Ends: कापिलेन पयसाष्टशतं जुहुयात् । जातिस्मरो भवेत् । ध्यानं पूर्ववत् ॥ ओं शान्ति शांति शांतिः ॥

Colophon: इति श्रीभट्टभास्करविरचिते यजुर्वेदभाष्ये अग्निकांडे पंचमप्रपाठके ज्ञानयज्ञाख्ये रुद्रप्रश्ने एकादशोनुवाकस्समाप्तः ॥ ओं शान्तिश्शांतिश्शांतिः । हरिः ओं श्रीसांबशिवार्पणमस्तु ॥ यादृशं० ॥

190. 22. R. 6.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf (S'rītāla). 21 folia. 9$\frac{7}{10}$" × 1½". 9—10 lines in a page. Grantha script. Wooden board at either end. Fairly old. Slightly worm-eaten. Good medium writing. Inked.

Complete.

Ascribed to Bhaṭṭabhāskara in the colophon, but except some slight variations, same as the one ascribed to Vidyāraṇya in the MSS. noticed hereunder and under No. 140 in the Descriptive Catalogue, Government Oriental MSS.

Library, Madras. Looks like an adaptation of the commentary of Kaus'ika Bhaṭṭabhāskara.

Begins :

अत: परमग्निकाण्डमेव अग्न्याधेयं। तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति। नमस्ते रुद्रमन्य इति। रुद्रो वा एष यदग्नि: तस्यैते तनुवौ इत्यादि। अस्य रुद्रसमुदायस्य ऋषिरग्निमार्ताण्ड:। महाविराट् छंद:। शंभुर्देवता। शातातप:—

स्तेयं कृत्वा सुरां पीत्वा ब्रह्महत्यां
च कृत्वा गुरुदारांश्च गत्वा।
भस्मच्छंनो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते सर्वपापै: ॥

याज्ञवल्क्य:—

सुरापी स्वर्णहारी च रुद्रजापी जले स्थित:।
सहस्रशीर्षजापी च मुच्यते सर्वकिल्बिषै: ॥
वेदमेकगुणं जप्त्वा तथाह्नैव विशुद्ध्यति।
रुद्रैकादशिनीं जप्त्वा तत्क्षणादेव शुद्ध्यति ॥
रोगवान् पापवांश्चैव रौद्रां जप्त्वा जले स्थित:।
रोगवान् पापाद्विनिर्मुक्तो महतीं श्रियमश्नुते ॥

आहतुरत्र्यंगिरसौ—:

एकादशगुणान्वापि रौद्रानावृत्य धर्मवित्।
महापापैरपि स्पृष्टो मुच्यते नात्र संशय: ॥

वायव्यपुराणे—:

यश्च रौद्रं जपेंनित्यं ध्यायमानो महेश्वरं।
यश्च सागरपर्यन्तां सशैलवनकाननां ॥
सर्वरत्नगुणोपेतां सवृक्षजलशोभितां।
विप्राय दद्याद्वसुधां चामीकरतरुज्वलां ॥
तस्मादप्यधिकं तस्य सकृद्रुद्रजपाद्भवेत्।
मम भावं समुत्सृज्य यश्च रौद्रान् जपेत्सदा ॥
स तेनैव च देहेन रुद्रस्संजायते ध्रुवं।
चमकं नमकं चैव पुरुषसूक्तं तथैव च ॥
नित्यं त्रयं प्रयुंजानो ब्रह्मलोके महीयते।
चमकं नमकं चैव जपंतं पुरुषं सदा ॥
प्रविशेत्स महादेवो गृहं गृहपतिर्यथा।

रोगवान्मन्यतोदङ् परेत्य रुद्रां जपंश्चरेदित्य . यज्ञसंयुक्त: कल्प इति। शतं रुद्रा: देवता अस्येति शतरुद्रीयमित्युच्यते। अनया च रुद्रोपनिषदा ब्रह्मविद्या प्रतिपाद्यते। ब्रह्मणश्च त्रीणि रूपाणि संति। एकं कार्यरूपं। इतरत् पुरुषाख्यं। सृष्टिस्थितिसंहारकर्तृत्वनिमित्तरूपमन्यत्।

मूर्त्यष्टकमधिष्ठाय बिभर्तीदं चराचरं।
आत्मत्रयमधिष्ठाय सृष्ट्यादि च करोति स: ॥

अस्य देवस्य तन्वौ द्वौ घोरान्या शिवान्येति। शक्ति: सर्वदा तस्य सहकारिणी। तस्य संहारकर्तृप्रभृतयो देवेभ्य: घोरास्तनव:। तासु भयशंका। तस्मात्प्रथमेनानुवाकेन तादृशं देवं तस्योपसंहारकारिणं नम इत्यादिभिर्नमस्कृत्य प्रसादयति। यैवास्य घोरा तनूस्तांतेन शमयतीति। ततस्तान्युपसंहार्य द्वितीयप्रभृतिभिरष्टाभिरनुवाकैर्वैश्वरूप्येण स्तुतिनमस्कारौ करोति। एवं हि देव: सुतरां प्रसीदतीति। ततो दशमैकादशाभ्यामभयं याचते। अयं महावाक्यार्थ:। प्रथमेनानुवाकेन क्रुद्धं देवं प्रसाद्य ततोऽष्टाभिरनुवाकै: किमधिष्ठानमधिष्ठाय देवस्तिष्ठतीत्यजानन् वेदपुरुष: सर्वं चराचरं तदधिष्ठानशंकया नमस्कृत्य अंत्याभ्यामभयं याचते। प्रा . . . ति किंचिद्रूपमधिष्ठाय निग्रहानुग्रहौ कर्तुमेवास्य लीलया स्थितमिदं विश्वं वश्यं वर्तते। अस्य पुरश्चरणादि द्वादशरात्रं कृच्छ्रं चरित्वा तत एकादशसहस्रमभिमतदिनानि . . रतं जपेत्। अनेन प्रदक्षिणनमस्कारौ दक्षिणामूर्तिसंनिधौ चरि . व्रत एका-

दश सहस्रजपादशेषं पापं नाशयति तस्मिन्नेव दक्षिणामूर्तिसंनिधौ स्वाग्निं निधाय घृतपायसं श्रपयित्वा सहस्रं जुहुयात् । साक्षाद्देवं पश्यति । तस्मिन्नेव सर्वतोरत्निमात्रं कुण्डमात्रं कल्पयित्वा कापिलेन घृतेन स्वाग्नौ शतसहस्रं जुहुयात् । गाणापत्यं लभते । अनेन च राजा पुरश्चरणसिद्धेन ब्राह्मणेन पूजां कारयेत् । लिंगस्य दक्षिणे कुण्डं पूर्ववत् कल्पयित्वा कापिलेन स्वाग्नौ स्वाग्निमाधायाज्यदूर्वातण्डुलशमीसमिद्भिः प्रत्येकमष्टसहस्रं जुहुयात् । देवस्य संनिधावष्टसहस्रं जपेत् । आलयमभितः प्रदक्षिणमष्टसहस्रं कृत्वा . . वत्प्रमाणं च कुर्यात् । एतैः प्रसंनो भगवान् भवति । नमस्ते रुद्रमन्यव इति । अनुष्टप् छंदः । कश्यप ऋषिः । रुद्रो देवता । हे रुद्र तव नमः । स्वात्मभूताय मन्यवे क्रोधाय अस्त्विवति वक्ष्यमाणमत्राप्यनुषज्यते । रोदयति सर्वमंत्यकाल इति रुद्रः । नादान्ते द्रवतीति वा रुद्रः । श्रुत्या वेदात्मना धर्माधर्मादीन् द्रावयतीति प्रापयतीति वा रुद्रः । श्रुत्या प्रणवरूपया स्वात्मानं प्रापयतीति वा रोरूयमाणो द्रवति प्रविशति मर्त्यानिति वा । रुद्रं संसारदुःखं द्रावयतीति वा अशुभद्रावको वा जहार पुनर्भवमिति वा रुद्रं शब्दं राति ददाति वा प्राणो रुद्र इति रुद्रं शब्दं वेदात्मानं ब्रह्मणे कल्पादौ ददाति वा रुद्रः । मन्यवे मन्युः क्रोधः । क्रोधात्मिका तव शक्तिः शांतरूपा भवतु मा बाधिष्ट भक्तान् । भक्तविषये तस्योपसंहारं प्रार्थयते । एवमिष्वादिकमपि वेदितव्यं ।

Ends : एतत्सर्वं पश्चिमद्वारे शंभवालये कर्तव्यं ।

वृषाधिरूडं देवेशं सर्वलोकैककारणं ।
ध्यायेद्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवं ॥

अस्य रुद्रसमुदायस्य केवलं जपमात्रेण सर्वसिद्धिर्भवति । त्रिषवणस्नायी जप्त्वा पंचपातकात् पूतो भवति । इत्येकादशानुवाकः ।

Colophon :

इति भट्टभास्करविरचिते यजुर्वेदभाष्ये श्रीरुद्रभाष्यं नाम एकादशोद्ध्याय: ॥ हरिः ओं शुभमस्तु । श्रीगुरुभ्यो नमः ।

191. 22. H. 16.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf. 14 folia (44 sq.). 19″ × 1¾″. 11 lines in a page. Grantha script. Old. In good condition. Fair medium writing. Inked.

Incomplete at the beginning, the whole of the introduction except the last few lines being lost in a missing leaf. Same as the last.

Colophon : इति भट्टभास्करविरचिते यजुर्भाष्ये श्रीरुद्रे एकादशोनुवाकः । अस्य रुद्रसमुदायस्य अघोरऋषिः . . . विनियोगः । श्रीरुद्रभाष्यम् समाप्तम् । हरिः ओम् । शुभमस्तु । श्रीगुरुभ्यो नमः ॥

192. 20. C. 78.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf. 1 folio (the last of the codex). 16½″ × 1½″. 7 lines in a page. Grantha character. Old. Damaged. Clear medium writing. Inked.

A fragment of the commentary on the last Anuvāka.

Ends: एवन्दश दक्षिणा: दश प्रतीची: दशो-दीची: दशोर्द्धा: अञ्जलिं कुर्म्म: । तेभ्यो रुद्रेभ्यो नम: । ते च नो मृडयन्तु । . . . . षाणम् यन्द्विष्म: । यश्च न: अस्मान्द्वेष्टि तं व: युष्माकमन्नम् । . मे दन्तनामैतत् । पार्श्वतो दन्तानाञ्जम्भा इत्यन्ये । जातावेकवचनम् । जंभेषु दधामि स्थापयामि । तम् भक्षय . . . . । रुद्रेभ्यो येन्तरिक्षस्थिता: एषां वात इति . . न्तरिक्षादभिवर्षितार: तेषाञ्च वात इषुस्थानीय: तेभ्यो नम इत्यादि पूर्ववत् । नमो रुद्रेभ्यो नये दिवि येषाम् . . . . मेवानामुपरिस्थिताम् तेभिवर्षन्ति तेभ्यो नम इत्यादि । तदेवं ये पृथिव्याम् येषामन्नमयेऽन्तरिक्षे येषां वातो ये दिवि येषाम् वर्षमिति स्थितेषु मन्त्ररूपेषु न . . . . तदिषवस्तेभ्य इत्यादि सर्वत्र समानम् ।

Colophon: इति श्रीरुद्रप्रश्नस्य व्याख्या समाप्त: । हरि: ओम् । इति श्रीभट्टभास्करमिश्रविरचितम् श्रीरुद्रभाष्यम् समाप्तम् । कर . . . . न्तु मर्हन्ति सन्त: ॥

193.   20. C. 18.

THE RUDRAPRAS'NABHĀṢYA OF VIDYĀRAṆYA

रुद्रप्रश्नभाष्यम्—विद्यारण्यकृतम्

Palm-leaf. 31 folia. $13\frac{1}{4}'' \times 1\frac{1}{2}''$. 8 lines in a page. Grantha script. Fairly recent. In good condition. Badly written in a medium hand. Uninked.

Complete.

Begins: ओम् । अत: परमग्निकाण्डमग्र्यार्षेयमग्निचयने चरमायामिष्टकायां शतरुद्रियं जुहुयादिति । नमस्ते रुद्र मन्यव इति ॥

Ends:

वृषाधिरूढन्देवेशं सर्वलोकैककारणं ।
ध्यायेत्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवं ॥

जपमात्रेण सर्वसिद्धिर्भवति । तृषवणस्नायी जपित्वा पञ्चपातकात्पूतो भवति ।

Colophon (fol. 30*b*): इति श्रीविद्यारण्यविरचिते यजुर्वेदभाष्ये श्रीरुद्रैकादशोनुवाक: ।

This is followed by

यावज्जीवं प्रणवमथवा वर्तयेद्रुद्रियं वा etc.

Looks like an abridgment of the commentary of Kaus'ika Bhaṭṭabhāskara and is the same as the one described under No. 140 in the Descriptive Catalogue, Government Oriental Manuscripts Library, Madras, where appears the following note:

"This commentary is attributed to Vidyāraṇya, but it does not agree with Sayaṇa's commentary on this portion of the Kṛṣṇa-yajurveda as found in the IV Kāṇḍa thereof. Moreover it does not begin with the Maṅgalas'loka found in all the Vedic commentaries of Sāyaṇa. The work described in the next number is attributed to Vidyātīrtha, and appears to be an abridgment of this commentary. Therefore, this may be the commentary by Vidyātīrtha, who is known to have been a Guru of the well-known Vidyāraṇya."

Much more positive evidence than what is adduced here is required to accept Vidyātīrtha as the author of the commentary against the testimony of MSS. which ascribe the work sometimes to

Bhaṭṭabhāskara and sometimes to Vidyāraṇya, but never to Vidyātīrtha. Compare also the Mysore Descriptive Catalogue No. 599. The suggestion is based on the much disputed identity of Vidyāraṇya and Sāyaṇa. See Vamana Sastri, preface to Rudrabhāṣya, Ānandās'rama Series, No. 2; R. Narasimhachar, Indian Antiquary, 1916, pp. 1 sq.; P. V. Kane, History of Dharmas'āstra, pp. 374 sq.; Guruvaṃs'akāvya, Vanivilas ed., V, 41—44; R. Rama Rao, Indian Historical Quarterly, 1930, pp. 701 sq., 1934, pp. 801 sq.; Doraiswami Aiyangar, Journal of Indian History, Vol. XII, pp. 241 ff.

Nor is there anything of an evidence showing that Sāyaṇa wrote two commentaries on the Rudrapras'na, one in his usual style (part of his Bhāṣya on the Taittirīya) and the other in quite a different one; but while this fact is not insufficient to prove a Vidyāraṇya different from Sāyaṇa it is, in the absence of further evidence, indecisive as to the identity of the author when we are confronted with more than one author of the name of the former. See R. Rama Rao, Indian Historical Quarterly, 1931, pp. 91-92; Keith, India Office Catalogue, Part 1, p. 712.

An abridgment of Bhaṭṭabhāskara's commentary, attributed to a Vidyāraṇya, is noticed under No. 136, Descriptive Catalogue, Government Oriental Manuscripts Library, Madras; another under No. 684, Tanjore Descriptive Catalogue.

194. 30. G. 15.

THE RUDRAPRAS'NABHĀṢYA OF VIDYĀRAṆYA

रुद्रप्रश्नभाष्यम्—विद्यारण्यकृतम्

Palm-leaf. 23 folia (foll. 12 ff.). $10\frac{3}{4}'' \times 1\frac{1}{4}''$. 9 lines in a page. Grantha character. Old. Worm-eaten and damaged. Good small writing. Uninked.

Complete.

Begins:

श्रीगणाधिपतये नमः।

गुरवे सर्वलोकानां भिषजे भवरोगिणां।

निधये सर्वविद्यानां श्रीदक्षिणामूर्तये नमः॥

श्रीशारदांबायै नमः। अतः परमग्निकाण्डमश्यार्षेय-मग्निचयनेन चरमायामीष्टकायां शतरुद्रीयं जुहुयादिति। नमस्ते रुद्र मन्यव इति।

Ends:

वृ . . रूढं देवेशं सर्वलोकैककारणम्।

ध्याये ब्रह्मादिभिः स्तुत्यं पार्वतीसहितं शिवम्॥

जपमात्रे . . . र्वसिद्धिर्भवति। त्रिषवणस्नायी जपित्वा पञ्चपातकात्पूतो भवति॥

Colophon: इति विद्यारण्यकृतौ श्रीरुद्रभा . . याजुर्वेदरुद्र एकादशोऽनुवाकः॥ ११॥

ओं साम्बशिवार्पणमस्तु। शिवाय नमः। श्रीदक्षिणामूर्तिरुचरणारविन्दाभ्यां नमः॥

The verses यावज्जीवं प्रणवमथवा etc. are not contained. Same as the one noticed above.

195. 9. F. 91.

THE RUDRAPRAS'NABHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

रुद्रप्रश्नभाष्यम् (वेदार्थप्रकाशः)—सायणकृतम्

Paper. 27 folia (foll. 62 ff.). $9\frac{3}{4}'' \times 4\frac{1}{2}''$. 9 lines in a page. Telugu script. Fairly

recent. In good condition. Clear medium hand.

Complete.

Begins : श्रीशंकरेशाय नमः । गुरुभ्यो नमः । हरिः ओं । प्रथमानुवाके प्रथमामृचमाह । नमस्ते रुद्र मन्यव उतो त इषवे नमः ।

Ends : हे रुद्राः वो युष्माकं जंभे विदारितान्ये दधामि स्थापयामि ।

Colophon : इति श्रीसायणाचार्यविरचिते माधवीय्ये वेदार्थप्रकाशके यजुःसंहितायां चतुर्थकांडे पंचमप्रपाठके एकादशोनुवाकः समाप्तः । श्रीगुरुभ्यो नमः ।

Date :

आषाढशुक्लसप्तम्यां शुभकृन्नामवत्सरे ।
रुद्राध्यायस्य टीकेयं सांबेन लिखिता मुदा ॥

196. 20. C. 30.

THE RUDRAPRAS'NABHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

रुद्रप्रश्नभाष्यम् (वेदार्थप्रकाशः)—सायणकृतम्

Palm-leaf. 22 folia. 15½" × 1⁴⁄₁₀". 7 lines in a page. Grantha script. Old. Worm-eaten and damaged. Fair medium writing. Uninked.

Complete.

197. 34. C. 3.

THE RUDRAPRAS'NABHĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम् वेङ्कटनाथकृतम्

Palm-leaf. 79 folia. 11¾" × 1½". 8 lines in a page. Grantha character. Wooden board at either end. Recent. In good order. Fair medium writing. Inked.

Complete.

Begins :

ईशानः सर्वविद्यानामीश्वरो निखिलात्मनां ।
जयत्यखण्डसर्वज्ञो जगदादिगुरुश्शिवः ॥
प्रसादितयजुश्शाखं प्रपद्ये शतरुद्रियं ।
सारमुद्धृत्य रुद्राणां सम्यग्व्याख्या विधीयते ॥

Ends : अत्र नमो रुद्रेभ्यो इत्यादिसमाप्त्यन्तं यजु . . यमेको मन्त्रः । अत्र देवा ऋषिश्च । रुद्र एव ध्यानं सहस्रश इत्यत्रोक्तमेव ग्राह्यं । अन्नसमृद्धिप्रदोयम्मन्त्रः । पुरश्चरणादिप्रकारः कृत्वोत्पादनजातिस्मरत्वादिफलभेदाश्च रुद्रकल्पादिषु द्रष्टव्याः प्रपञ्चिताः । समाप्त श्रीरुद्राध्यायप्रश्नः ॥

Colophon : इति श्रीपरमहंसपरिव्राजकसार्वभौमश्रीमदद्वैतविद्याप्रतिष्ठाभिनवशंकरभगवद्भिः कृतं श्रीरुद्रभाष्यं संपूर्ण ॥

Published by the Vidyamudraksara Press, Kumbakonam, and by Vani Vilas Press, Srirangam. Though ascribed often wrongly to Abhinavas'aṃkara, this is not by him, but by his disciple Veṅkaṭanātha. See Bhagavaddatta, History of Vedic Literature, Vol. 1, Part II, pp. 125-26. The identity is proved by the author's reference to Pāṣaṇḍagajakesariṇī as his work both here (Rudra 2. 3) and in another of his works, *viz.*, Brahmānandagiri, Vani Vilas ed., p. 206. See K. Madhava Krishna Sarma, Adyar Library Bulletin, Vol. IV, Part IV, Manuscripts Notes.

198. 25. L. 25.

THE RUDRAPRAS'NABHĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम्—वेङ्कटनाथकृतम्

Palm-leaf. 117 folia. 16½″ × 1½″. 5 lines in a page. Grantha character. Old. Worm-eaten and badly damaged. Fair large writing. Inked.

Complete. Same as the above.

Colophon: श्रीमत्परमहंसपरिव्राजकसार्वभौमश्रीमदद्वैतविद्याप्रतिष्ठापनाभिनवशंकरभगवता कृतं श्रीरुद्रभाष्यं समाप्तं ॥

At the end: ओमबुब्रैव सर्ववत् ।

प्रजोत्पत्तिनमके वर्षे कन्यामासे बुधे सिते ।
वश्चेन्यां वेतवने लिखितं रुद्रभाष्यकं ॥
लिखितं ब्रह्मविदुषा सुब्बूनाम सुयज्वनां ।
तदिदं भाष्यं श्रीविश्वरूपेन्द्रस्वामिनाम् । हरिः ओम् ।

199. 30. H. 26.

THE RUDRAPRAS'NABĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम्—वेङ्कटनाथकृतम्

Palm-leaf. 48 folia. 14¼″ × 1¼″. 5 lines in a page. Grantha character. Fairly old. In good condition. Cursive medium writing. Inked.

Incomplete, breaking off in the 7th Anuvāka.

Begins: श्रीमहागणाधिपतये नमः । इत्थं श्रीरुद्रस्य सकलपापनिवर्तकत्वेन सर्वोपासनफलप्रदत्वेन च कर्मोपासनादि उपासनं ज्ञानकाण्डात्मकसकलमेव तत्वं तत्र च श्रुतिस्मृतीतिहासपुराणानि तत्तात्पर्यतः न्यासविधिश्चेत्येतत्सर्वं निरूपितं । इदानीं श्रीरुद्रोपनिषदमर्थतो व्याख्यास्यामः । अत्र हि एकादशानुवाकाः । तत्राद्यो भगवतः प्रसादनं । द्वितीयादिषु अष्टसु सर्वेश्वरत्वसर्वात्मकत्वसर्वान्तर्यामित्वादिरूपेण भगवन्नमस्कारः । ततो दशमे भगवतः प्रार्थना । एकादशे भगवदंशरुद्रसंघप्रार्थनेति एकादशानुवाकात्मकश्रीरुद्राध्यायार्थः । तत्र तावन्निजपापकुपितमीश्वरं प्रसादयितुन्नमस्करोति । नमस्ते रुद्रेति । हे रुद्र हे प्रणतदुःखविद्रावक । ते तव । मन्यवे क्रोधाय । नमोस्तु । न च निरस्तसमस्तदोषे निखिलकल्याणगुणसमुद्रे च भगवति कथं क्रोधप्रसक्तिरिति वाच्यं । दुष्टनिग्रहशिष्टानुग्रहस्वभावे निर्गृण्यविषयस्य अलंकारत्वेन अदोषत्वात् ।

श्रुतिस्मृतिर्म्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते ।
आज्ञाच्छेदी स मद्वेष्यः स मे वध्यश्च जायते ॥

इति भगवतोक्तत्वात् न चैवं वैषम्यनैर्गृण्यप्रसंग यिति वाच्यं । तत्तत्प्राणिकर्म्मानुसारेण निग्रहानुग्रहौ कुर्वतः तस्य तदप्रसक्तेरिति ब्रह्ममीमांसायां परं प्रपंचितं । अत्र रुद्रेति हेतुगर्भसंबोधनं । अत्र रुद्रशब्दो हि रु द्रावयतीत्यर्थे ।

रुद्दुःखं दुःखहेतुर्वा तद्द्रावयति नः प्रभुः ।
रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥

इति पौराणिकैर्व्युत्पादितः पृषोदरदिः । तथा च पृणतदुःखतद्धेतुपापद्रावकस्य तव पृणते मयि पापनिवर्त्तकम् । क्रोधः परिहर्तुं युक्त एव अभिप्राये द्रष्टव्यः । भगवन्तं प्रसाद्य तथा युयान्यपि नमस्कारेण प्रसादयति । उतो त इति । अपि चेत्यर्थः । हे रुद्र ते तव सुमृतिरूपस्वबाणाय नमोस्तु । तथा इष्वावादनभूताय ते तव धन्वने धनुषे नमोस्तु । धनुर्बाणव्यापृश्रुतिस्मृतिरूपस्वज्ञाविलंघिने पापिष्ठाय परमेश्वरः क्रुद्ध्यति । ततस्तत्प्रहरणार्थमिषुरूपाविष्ट ते ततस्सदोपादाने दृष्टि-

र्भवति। ततो धनुर्बाणग्रहणाय बाहुभ्यांग्रीयते इति क्रमः। अनेन क्रमेणात्र नमस्कारक्रमः। अनन्तविचित्रशक्तेर्भगवतो दिव्यशक्तिविलासरूपा जगदुपास्यदेवतमूर्तय एव इष्टादय इति तन्नमस्कारप्रार्थनादिकं यूक्तमेव।

Ends: तथा अश्वादिसञ्चारयोग्यः प्रौढमार्गः पथाः तत्र भवः पथ्यः। कुत्सितमटति जलमत्रेति अटो अल्पजलप्रदेशः। तत्र भवः काव्यः। यत्र जलं न्यक् भावेन पतति स देशो नीपः। तत्र भवः नीप्यः। सूदः कर्दमः। तत्र भवस्सूद्यः। सरः प्रसिद्धः। तत्र भव स्वरस्यः। नद्यां भवो नाद्यः। अल्पसरो वेशान्तः। तत्र भवो वैशन्तः। आपे भवः आप्यः। अवटे गर्त्ते भवोवाव्यः। वर्षे भवो वर्ष्यः। वर्ष्याभावो अवर्षः। तत्र भवो अवर्ष्यः। वर्षतादभावयोः प्रेरत इत्यर्थः। मेखे भवो मेघ्यः। विद्युति भवो विद्युत्यः। ईध्यं निर्मलत्वेन दीप्यमानं शरदभ्रं तत्र भवं ईध्रियः। आतपे भवः आतप्यः।

200. 28. J. 54.

RUDRAPRAS'NABHĀṢYA—ANONYMOUS

रुद्रप्रश्नभाष्यम्—अज्ञातकर्तृकम्

Palm-leaf. 42 folia. (35 ff.). 12½″ × 1¼″. 8 lines in a page. Grantha script. Wooden board at either end. Fairly recent. In good condition except for a few worm-holes. Closely written in a cursive medium hand. Inked.

Complete.

Author's name does not appear. Differs from those attributed to Bhaṭṭabhāskara and Vidyāraṇya, but at places looks like an abridgment of the commentary of Kaus'ika Bhaṭṭabhāskara.

Begins:

अतः परमग्निकाण्डमङ्यार्षेयं। तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति नमस्ते रुद्रमन्यव इति। रुद्रो वा एष यदग्निः स एतर्हि जातः इत्यादि ब्राह्मणम्। अत्र श्रुतिस्मृतिपुराणादिषु प्रसिद्धं मोक्षस्वर्गवित्तारोग्यायुर्भवतीष्ट्यादि फलानि बहूनि विद्यन्ते। तेषु केचित् प्रयोगविशेषाः प्रतिमन्त्रं वक्ष्यन्ते। अस्य श्रुतिस्मृतिपुराणोक्ता बहवो महिमानुगुणा लक्ष्यन्ते। तत्र कांश्चिद्वयं ब्रूमः। अत्र जाबालोपनिषत्—अथ हैनं ब्रह्मचारिण ऊचुः जप्येनामृतत्वं ब्रूहीति। सहोवाच याज्ञवल्क्यः शतरुद्रीयेणेति। एतानि ह वा अमृतस्य नामधेयानि एतैर्हवा अमृतो भवतीति। तस्मादविमुक्तमाश्रितो भवति यः शतरुद्रमधीते। सोग्निपूतो भवति। स वायुपूतो भवति। ब्रह्महत्यात् पूतो भवति। सुरापानात् पूतो भवति। अगम्यागमनात्पूतो भवति। आह शातातपः—

स्तेयं कृत्वा गुरुदारांश्च गत्वा
सुरां पीत्वा ब्रह्महत्यां च कृत्वा।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते सर्वपापैः॥ इति।

आह याज्ञवल्क्यः—
सुरापरवर्णहारी च रुद्रजापी जले स्थितः।
तथा—
सहस्रशीर्षजापी च मुच्यते सर्वकिल्बिषैः॥
सर्वपापहराह्येषा रुद्रैकादशिनी मता।
वेदमेकगुणं जप्त्वा तदह्ने च विशुद्ध्यति॥
रुद्रैकादशिनीं जप्त्वा तदह्नैव विशुद्ध्यति।
आह शंखः— स्वर्णस्तेयद्राद्राध्यायी मुच्यत इति।
आहतुरत्र्यङ्गिरसौ—
एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥

वायुपुराणे—

यश्च रुद्रान् जपेन्नित्यं ध्यायमानो महेश्वरं ।
यश्च सागरपर्यंतां सशैलवनकाननां ॥
दद्यात्कांचनसंयुक्तां भूमिमोषधिसंयुतां ।
तस्मादाप्यधिकं तस्य सकृद्रुद्रजपाद्भवेत् ॥
मम भावं समुत्सृज्य यस्तु रुद्रान् जपेत्सदा ।
स तेनैव च देहेन रुद्रस्संजायते ध्रुवम् ॥
जपेनानेन विप्रेन्द्राः पापाश्चान्ये द्विजातयः ।
हित्वैव सकलं पापं गताश्शिवं पुरा ॥
अहं च परमेशस्य सामीप्यं लब्धवांस्तथा । इति ।
चमकं नमकं होतॄन् पुरुषसूक्तं जपन् सदा ।
प्रविशेत्समहादेवं ग्रहं ग्रहपतिर्यथा ॥
भस्मदिग्धशरीरस्तु भस्मशायी जितेन्द्रियः ।
सततं रुद्रजाप्येव परां मुक्तिमवाप्स्यति ॥
रोगवान् पापवांश्चैव रुद्रान् जप्त्वा जितेन्द्रियः ।
रोगात्पापात्प्रमुच्येत रुद्रलोकं च गच्छति ॥
रुद्राध्यायी वसेत्यत्र ग्रामे वा नगरे ऽपि वा ।
न तत्क्षुत्पिपासाद्या दुर्भिक्षा व्याधयो ऽपि वा ॥

आह शंखणः—रहसि कृतानां महापातकानामपि शत रुद्रीयं प्रायश्चित्तमिति । आपस्तम्बश्च—यस्य रुद्रः प्रजां पशूनभिमन्येतोदङ् परेत्य रुद्रान् जपेत् इत्ययज्ञसंयुक्तः कल्पः । एकशतमध्वर्युशाखास्तासु सर्वासु रुद्रोपनिषदाम्नायते । शतं रुद्रा देवतास्येति शतरुद्रीयमुच्यते । अनया रुद्रोपनिषदा ब्रह्मविद्याया ब्रह्मविद्या प्रतिपद्यते । ब्रह्मणश्च त्रीणि रूपाणि संति एकं कार्यरूपं । इतरत्

चमकं नमकं चैव पुरुषसूक्तं तथैव च ।
नित्यं त्रयं प्रयुंजानः शिवलोके महीयते ॥

पुरुषाख्यं सृष्टिस्थितिसंहारनिमित्तं । अन्यत् परं रूपं निर्विकल्पं निरंजनं सत्यज्ञानानन्तानन्दलक्षणं तदेतद्रषिणाप्युक्तं—विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोस्तु । यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवश्शुभया स्मृत्या संयुनक्तीति । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्त्विति । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोमिति ।

क्वचित्क्वचिदनाभोग्यः क्वचित्क्वचिदनाविलः ।
जयत्यनादिनिधनो महादेवो महार्णवः ॥

इति ।

मूर्त्यष्टकमधिष्ठाय बिभर्तीदं चराचरम् ।
आमनुत्वमधिष्ठाय सृष्ट्यादि च करोति च ॥

स तत्र योसौ संहारकर्ता तं देवस्सर्वदाधितिष्ठति । कार्यकालेत्वन्या स च देवस्य घोरा तनूः अन्या शिवा यथोक्तं तस्यैते तनुवौ घोरान्या शिवान्या चेति । शक्तिश्चापि विचित्रा सा सर्वदा सहकारिणी । यच्छतरुद्रीयं जुहोति यैवास्या घोरा तनूस्तांतेन शमयति । ततस्तान्युपसंहार्य प्रथमेनानुवाकेन देवं प्रसाद्य द्वितीयप्रभृतिभिरष्टभिरनुवाकैर्देवं वैश्वरूपेण स्तुत्वा त्वान्नमस्कारं च करोति । एवं हि देवस्सुतरां प्रसीदति । ततो दशमैकादशाभ्यामभयं याचते । देवो हि परमस्वातन्त्र्य भूमिः किंचिदधिष्ठाय निग्रहानुग्रहौ जगतः करोति । तथा हि यक्षरूपेणागत्य देवान्व्यामोहयामास । विटवेषधारी सपत्नीकानृषीन्वृतात् भ्रेषयामास । किरातवेषालंकृतस्सन् पाण्डुसुतेन सह चिक्रीड । चण्डालाकृतिमास्थितः कस्यचित् भृत्यस्याड्याकारमभ्यर्चित प्रविवेश । एन्द्रेण रूपेण कंचित् भृत्यं तपसश्च्यावयितुमियेष । अर्भकरूपेण देव्या उत्संगमधिशिश्ये । औलंकेन वपुषा कस्मै-

चिद्रषये ज्ञानमुपदिदेश । भूविवरभ्रष्टं हविः कस्यचित् भृत्यस्य तत्रैवं कृतसंनिधानो बुभुजे । एवंविधवेषधर-विग्रहपरिग्रहेण क्रीडतो देवस्य लीलाविलसितमिदं विश्वं वश्यं वर्तते । अतो वैश्वरूप्येण स्तुत्वा नमस्करोतीति । यथोक्तं—

चरितानि विचित्राणि गुह्यानि गहनानि च ।
ब्रह्मादीनां च सर्वेषां दुर्विज्ञेयो हि शंकरः ॥

अस्य श्रीरुद्रप्रश्नसमुदायस्य भगवानग्निकाण्ड ऋषिः । महाविराट् च्छंदः । शंभुर्देवता । अथास्य पुरश्चरणं कृच्छ्रं चांद्रायणं वा सामान्यप्राप्तं कृत्वा अष्टासहस्रं जपेत् । कृतपुरश्चरणो भवति । अथ कर्माणि कुर्यात् । यद्यदुद्दिश्य अष्टासहस्रमष्टाविंशतिमेकविंशतिमेकादश वा जपं कुर्यात्तत्तदभीष्टमीश्वरप्रसादाल्लभ्यन्ते । जपसाद्गुण्यार्थं ब्राह्मणान् भोजयेत् । एकादशवारमावर्त्य शिवस्याभिषेकादभीष्टं सकलं लभते । तत्र बोधायनः— अथातो रुद्रस्नानार्चनाविधिं व्याख्यास्यामः । इति विधिमप्युक्त्वा फलमप्याह—श्रीकामश्शान्तिकामः पुष्टिकामस्तुष्टिकामो मोक्षकामो व्याधिमोचनार्थी पापक्षयार्थी च कुर्यात् दश गास्सवत्सा स्वर्णभूषिता ऋषभैकादशा एकां गां दक्षिणां दद्यादित्याह भगवान् बोधायनः । यद्वा उदकपूर्णं कुंभं रुद्रेणाभिमंत्र्य शतसंख्या सहस्रसंख्या वा साद्वयमभिषिंचेत् । नीरोगं शतायुष्यं लभते । अपमृत्युं जयति । नमस्ते रुद्र इत्यस्य काण्डऋषिः । अनुष्टुप् छंदः । रुद्रो देवता ।

आकर्णकृष्टे धनुषि ज्वलन्तं
दैवीमिषुं भास्वति संदधानं ।
ध्यायेन्महेशं महनीष्ववेषं
देव्या युतं मौ . तनुं युवानं ॥

अथास्य पुरश्चरणं कृच्छ्रं द्वादशरात्रं जप्त्वा एकादशसहस्रमभिहितं दिनानि निरंतरं जपेत् । कृतपुरश्चरणो भवति । ततो शेषपापं नश्यति लक्षजपात् । ततोनेन मंत्रेण प्रदक्षिणनमस्कारं च कुर्यात् । ततो दक्षिणामूर्तिसंनिधावेकादशसहस्रं जपात् सहस्रजन्मकृतपापं नश्यति । तस्मिन्नेव दक्षिणामूर्तिसंनिधावग्निमाधाय घृतपायसं श्रपयित्वायुतं जुहुयात् । साक्षाद्देवं पश्यति । तस्मिन्नेव वा सर्वतोरत्निमात्रं कुण्डं खात्वा साग्नौ कापिलेन घृतेन शतसहस्रं जुहुयात् । गाणपत्यं लभते । शतं रुद्रास्य देवताः संतीति तेषां रुद्राणामिदं शतरुद्रीयं । अत्र शिवः परमात्मा स्तूयते । क्वचिदेकः क्वचिन्नानायोनिषु सर्वत्र शिवावतार श्रूयते । यत्र यत्र शिवां शस्याविभावः तत्र महत्वं दृश्यते देवेषु ब्रह्मादयः असुरेषु बलिबाणादयः मनुष्येषु धर्मपुत्रादयः मृगेषु गवादयः स्थावरेषु मेरुप्रभृतयः वृक्षेषु कल्पकादयः कृमिष्वपि वज्रकीटादयः श्रूयन्ते । अत एव वृक्षादीनामपि नमस्कारं क्रियते । नम इति प्रह्वार्थे । रुद्र इति । सर्वमन्तकाले रोदयतीति रुद्रः । रुजं संसारं द्रावयतीति रुद्रः रुक् प्रणवः तेनात्मानं प्रति पादयतीति वा रुद्रः । मन्यवे सर्वेषां हिंसासाधानानां मन्युः प्रसाधनत्वात् अस्त्विवति सर्वत्रानुषज्यते । उतो इति चकारार्थः । इषवे बाणाय अच्युतानिलसायकमिति पुराणे । धन्वने तदपि रत्नसानुशरासनमिति प्रसिद्धं । बाहुभ्यामिति रुद्रस्यानेकबाहवः । अत्र पूर्वोक्तधनुर्बाणधरौ बाहू उच्येते । ताभ्यां नम इति भावः ॥ १ ॥

यात इषुरित्यस्यात्रेयऋषिः । अनुष्टुप् छंदः । शंभुर्देवताः ।

ध्यायेद्देवं सुस्मितं स्यंदनस्थं
देव्या सार्द्धं तेजसा दीप्यमानं ।
इष्विष्वासालंकृताभ्यां कराभ्यां
शूराकारस्तूयमानं सुरौघैः ॥

. . . .
. . . .

Ends:

ये दिवि स्थिता रुद्रा येषां वर्षमिषवः वर्षेनैव मारयितव्यान् मारयति तेन्य इति सर्वं पूर्ववत् ।

किं किं न सिद्ध्यति नृणां साधकानां धृढात्मनां ।
प्रायच्छत्यखिलान् कामान् देहांते परमां गतिम् ॥
उक्तं रुद्रप्रभावेन सर्वमेव यथातथं ।
सार्वभौमकरं होमं कलशस्थापनं तथा ॥
जातिस्मरक्रियापुण्या सर्वमुक्तं विशेषतः ।
अपमृत्युंजयं कर्म राज्ञामेव विशेषतः ॥
सर्वमेतदनेनैव साद्ध्यं तद्भक्तियोगतः ।
इत्येकादशानुवाकः ।
सर्गवत् पुराग्निरालोकं येदेतं निष्कलं परं ।
चिदानंदमयं ज्योतिस्स आद्यः केवलः शिवः ॥
स एवादौ रजोरूपं सृष्ट्वा ब्राह्मणमात्मनः ।
सृष्टिः कर्मनि युक्ताश्च तस्मै वेदाश्च दत्तवान् ॥
पुरश्च जगतामीश आत्मतत्वैकसंग्रहं ।
सर्वोपनिषदां सुरा रुद्राद्ध्यायं च दत्तवान् ॥
यदेकमस्य यं साक्षात् ब्रह्मज्योतिस्सनातनः ।
शिवात्मकं परं तत्वं रुद्राध्याये प्रतिष्ठितं ।
स आत्मभूस्सृजन्विश्वं चतुर्भिर्वेदनैर्विराट् ॥
ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे ।
तत्रायं यजुषोर्मद्ध्ये ब्रह्मणो दक्षांसमुखात् ॥
अशेषा उपनिषत्सारो रुद्राद्ध्यायः सुमुद्धृतः ।
स एव मुनिभिः पूर्वैः मरीच्यत्रिपुरोगमैः ॥
सहवेदैर्धृतस्तेभ्यस्तच्छिष्या जगृहुश्च तं ।
तच्छिष्यपुत्रैस्तत्पौत्रैः पारंपर्यक्रमागतैः ॥
धृतो रुद्रात्मकस्सोयं वेदसारवृसानितः ।
एष एव परो मंत्र एष एव परं तपः ॥
रुद्राद्ध्यायं जपन् पुंसां परं कैवल्यसाधनम् ।
ये महावातकैर्युक्ता उपपातकिनश्च ये ॥
रुद्राद्ध्यायजपांस्तेपि यांति परां गतिं ।

इति ब्रह्मोत्तरखण्डे रुद्रभाष्यं समाप्तं । शुभमस्तु ॥

201. 40. E. 42.

THE RUDRAPRAS'NABHĀṢYA OF MAHĪDHARA

रुद्रप्रश्नभाष्यम्—महीधरकृतम्

Paper. 8. folia (marked 1—10, evidently by a later hand which does not note the missing folio in which is lost the commentary on the first 9 Ṛks; foll. 5 and 6 are missing). 9¾″ × 4¼″. 13—17 lines in a page. Devanāgarī script. Old. Much worn; edges frayed. Cursive medium writing.

Incomplete, Ṛks 1.1—9, 3.4—5. 6 and 11.4—10 (together with the Paris'iṣṭa) being wanted. The first two folia contain in the same hand as the rest the following commentary on Anuvāka 2. 9 of the Maitrāyaṇī Saṃhitā. There is nothing here to show that this does not form part of the commentary.

आ त्वेत्यस्य हिरण्यगर्भऋषिः । निचृज्जगती च्छंदः । शर्वो देवता । आवाहने विनियोगः । आत्वा वहन्त्विति । हे शर्व श्रृणोति हिनस्ति सर्वानपि दुष्टान् दैत्यादीन् वैदिकमार्गरक्षणायेति शर्वो दुष्टघातको महादेवः । तस्य संबोधनं हे शर्व दुष्टहिंसक । सुचेतसः सुप्रज्ञाः । हरयः हरंति भक्तगृहान् प्रतीति हरयो भक्तगृहप्रापकाः । वाताः वांति अतिशीघ्रं गच्छंतीति वाताः अतिशीघ्रगामिनः नंदिभृंग्यादयो गणाः । ते मनोजवैः बलवद्भिः प्रजावद्भिः श्वेतैः श्वेतवर्णैः अश्नुवते छ्मानमित्यश्वा वृषभाः । तैः जवैः जवंते पर्यायेण गच्छंति वाहयंति इति जवाः । पर्यायेण स्वयं गच्छंतः संतः शर्वं वाहयन्त इत्यर्थः । तै शर्वं वाहयद्भिः स्वयं गच्छद्भिः वृषभैरनेकैरनंतैः एकस्य वा सतः नानारूपाविष्कारेणानेकैरीश्वरस्य यथाभिप्रायं नानाविग्रह-

वह्निः । त्वा त्वामिमाम् । अस्मिन् यज्ञे महारुद्रातिरुद्रादिरूपे । हव्याय हूयमानाय तिलादिद्रव्याय । तद्द्रव्यं आदितुमित्यर्थः । तुमर्थाच्च भाववचनादिति चतुर्थी । त्वा त्वां । आवहंतु आभिमुख्येन प्रापयंतु ॥ १ ॥

देवानामिति । अनुष्टुप्छंदः । शिवो देवता । आवाहने विनियोगः । यतः पूर्वस्यां हरयो वाताः दुष्टहिंसक त्वं त्वां आवहंतु इति प्रार्थितं अतोस्यामनंतरायां शि . . . णावाहनमुचितं । शर्वेत्यनुवर्तते । हे शर्व देवानामिन्द्रादीनां ऋषीणां च भरद्वाजादीनां पूर्वजं असुराणां हिरण्याक्षादीनां विष्णुरूपेण शुंभनिशुंभादीनां च देवीरूपेण तारकादीनां च स्वामिकार्तिकेयरूपेण अंधकजासंवरादीनां च स्वात्मरूपेण हंतारं संतं पूर्वजं पूर्वे जातं अत एव महादेवं महांतं अतिप्रभूतं संतं देवं दानादिगुणयुक्तं सहस्राक्षं सर्वलोकसाक्षिणं शिवं कल्याणकारिणं अहमावाहयामि अभिमतसिद्धये ॥ २ ॥

तत्पुरुषायेति । सर्वत्र तदिति पदद्वयं वरीवर्ति । तदुभयमप्यव्ययं । तत्राद्यं चतुर्थ्यन्तं । द्वितीयं हेतौ पंचम्यन्तं । तत्राद्यं चतुर्थ्यन्तं । द्वितीयं पंचम्यन्तं । विद्महे इति सर्वत्र । धीमहीति च । प्रचोदयादिति च । तेन एकमंत्रव्याख्यानेन सर्वेषामपि व्याख्यानं बोद्धव्यम् । अन्यानि पदानि तत्र तत्र व्याख्येयानि । अथ व्याख्या । आ त्वा वहंतु हरय इति प्रार्थनायां कृतायां देवानां चेति आवाहने कृते सति तत्पुरुषायेति । तत् तस्मै श्रुतिस्मृतीतिहासपुराणाग . . . . मादिसिद्धाय पुरुषाय पुरि शरीरे बुद्धौ वा विषयोपलब्ध्यर्थं सादते । यद्वा पुरुषाय पुरि शयाय पुरि शरीरे बुद्धौ वा विशेषेण शयानाय वर्तमानायेत्यर्थः । अथ वा पुरुषाय पु पूरुषेण येन सः सर्वं जगत इति पुरुषः । तस्मै पुरुषाय जगद्व्यापिने इत्यर्थः । एतादृशाय महादेवाय त्वं प्रसादयितुं । तुमर्थादिति चतुर्थी । विद्महे वयं सपरिवाराः श्रवणमनननिदिध्यासनादिभिः सम्यक् जानीमः । अत एव तस्मै धीमहि अहनि प्रार्थयेमहि प्रार्थयामः । तत् तस्माद्धेतोः नोस्मान् रुद्रः रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरूदत् तद्रुद्रस्य रुद्रत्वमिति काठकं । यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति **हारिद्रविकमिति यास्कः** । अथैतस्य **दुर्गसिंहकृतं भाष्यम्** । रुद्रः कस्मात् रौतीति सतः । सहि स्तनयित्नुशब्दं करोति । रोरूयमाणो द्रवतीति वा शब्दं कुर्वाणो मेघोदरस्थो द्रवतीति । रोदयतेर्वा शत्रून् रोदयति दुःखयति । ब्राह्मणमपि च तस्मिन्नर्थे भवति—हृदरुदत्तद्रुद्रस्य रुद्रत्वम् इति काठकं । कठानां प्रवचनम् । ऐतिहासिकैरेतत्समवैति । स किल पितरं प्रजापतिमिषुणाविध्यत् । तमनुशोचन्नरुदत् । तद्रुद्रस्य रुद्रत्वम् यदरोदीदिति **हारिद्रविकं** । स एवार्थः केवलं शाखान्तरमन्यत् । एवं शाखान्तरेभ्यो ऽपि देवताभिधाननिर्वचनान्युपेक्ष्याणीति । उप प्रदर्शनार्थं । **हारिद्रवो नाम मैत्रायणीयानां** शाखाभेदः इति । एतन्निर्वचननिरुक्तो रुद्रो नोस्मान् प्रचोदयात् प्रेरयतु । धर्म्ये कर्माणि महारुद्रातिरुद्रौ इति प्रार्थयामः ॥ ३ ॥

तत् गां गौव्येति । गाः स्तुतिरूपाः श्रुतिस्मृतीतिहासपुराणादिसंबन्धिनीः महादेवविषयिणीः वाचः । अंचति पूजयति यद्वा गच्छति प्राप्नोति तात्पर्येण शृणोतीति गोवी । हिमालयपत्नी **मेना** । तस्याः अपत्यं गौच्यः । स्त्रीभ्यो ढगिति ढकि प्राप्ते व्यत्ययेन गर्गादिभ्यो यगिति यक् । किति वृद्धिः । तेन गौच्यो मेनासुतः मैनकः । मेनासुता पार्वती । गिरेः हिमावलस्य सुतः मैनाकः । सुतापि सैव पार्वती । अग्निरूपत्वेन अतिपराक्रमत्वेन च पुंस्त्वमुभयोः शब्दयोः । ततश्च तत्तत्प्रसादयितुमित्यर्थः । (. . . . . र्णीया पुंस्त्वं जातवेदस इति **सायणमाधवशंकरप्रभृति** . सोपपत्तिकं व्याकृतं । इह तु विस्तरभिया न लिख्यते ।) वयं विद्महे जानीमः । धीमहि ध्यायेमहि

च । तत्तस्मान्नोस्मान् गौर्च्या गिरिसुता गौरी पार्वती जगदंबा दुर्गा प्रचोदयात् प्रेयतु मत्कर्मणीति महादेवगायत्र्यनन्तरं देवीगायत्र्या उचितत्वादानंतर्यं ॥ ४ ॥

तत्कुमारेयति । कौ पृथिव्यामवतीर्णः सन्मारयति तारकादीनिति कुमारस्वामि कार्तिकेयः स्तस्मै । कार्तिकेयाय षण्णां कृत्तिकानामत्यं कार्तियस्तस्मै । स्कंद स्कन्दति गच्छति शोषयति वा शत्रूनिति स्कंदस्तस्मै । अन्यत्पूर्ववत् । पित्रोरनन्तरं ज्येष्ठपुत्रगायत्र्या औचित्यं ॥ ५ ॥

तत्कराटायेति । कराटाय विकटाय शत्रूणामतिभयानकाय । हस्तिवन्मुखं यस्यासौ हस्तिमुखस्तस्मै । दंता प्रशस्तौ दंतौ विद्येते यस्यासौ दंती । औरसस्कंदाख्यपुत्रानन्तरं अनौरसस्य विघ्नहरस्य गायत्र्युचिता ॥ ६ ॥

तच्चतुर्मखायेति स्पष्टो ऽर्थः ॥ ७ ॥

सपरिवारमहादेवानन्तरं विष्णुगायत्र्या औचित्यम् ॥ ८ ॥

तद्भास्करायेति । भासं प्रकाशं करोतीति भास्करः तस्मै भारूपे धामेत्यर्थः । स्वतःप्रकाश इति यावत् । प्रभां स्वत एव स्वस्य भां भानं प्रकाशं करोतीति प्रभाकरः । तस्मै स्वयं स्वत एवात्मानं प्रकाशयन् सकलं जगत्प्रकाशयतीत्यर्थः । दीप इव नानापदार्थान् भानुः भाति चतुर्दशभुवनमध्ये अग्न्यादिस्वयं प्रकाशेभ्यः अधिकं दीप्यत इति भानुः । सविता शिवब्रह्मविष्णुभ्योनन्तरं तत्त्रयीरूपत्वेन वेदत्रयीरूपत्वेन भानुगायत्र्या औचित्यम् ॥ ९ ॥

तत्सोमराजेति । सोमश्चासौ राजा च सोमराजः तस्मै सोमराजाय सोमाभिधाय द्विजराजायेत्यर्थः । सोमोस्माकं ब्राह्मणानां राजेत्यादि श्रुतितः द्विजराज इति नामप्रसिद्धेश्च । महाराजाय महांश्चासौ राजा च महाराजः तस्मै महाराजाय असपत्नराजाय ते इत्यर्थः । चंद्रः चंदति अह्लालब्दयति सकलं जगदिति चंद्रः । चिदि आह्लादे । चंद्रः चंदते कांतिकर्मण इति यास्कः । भानोरनन्तरं

राजा रविः शशी राजा मगलो मण्डलेश्वरः ।
इतित्यादिज्योतिःशास्त्रतः भानो पत्युरनन्तरं
तत्पत्न्याः सोमस्य गायत्र्या औचित्यम् ॥१०॥

तजसनायेति । वैश्वानराया वैश्वानरः . . स्माद्विश्वानरान्नयति विश्व एनन्निर्वचननिरुक्ता मा वह्निः वहति देवेभ्यो हविः प्रापयतेति वह्निः इति । देवानामतिवदत्र यस्य सोमस्य हवनाधिकरणं देवेभ्यश्च हविषां वोढा वह्निरेवेति सोमानन्तरं वह्निगायत्र्या औचित्यं ॥ ११ ॥

तत्यजपायेति । त्यजात् क्रौध्मन् प्राप्तेष्वपराधेषु देवादीनां संबन्धिनः सकाशात् पाति रक्षतीति त्यजपः स्तस्मै । त्यजपाय देवादीनां क्रोधात्राकर्त्रे । हेळः हरः हृणिः त्यजः इति क्रोधनामसु पाठात् । महाजपाय महांश्चासौ जपश्च महाजपः यथोक्तपुरश्चरणादिरूपस्तस्मै महाजपाय । ध्यानः ध्याप्यते अस्मिन् देवतेति ध्यानो ध्यानाधिकरणं महाजप एव । इति पुरश्चरणरूपस्य महाजपस्य अहुतो न फलप्रद इति वचनात् होमस्यात्यावश्यकत्वात्तद्दशांशस्य तदधिकरणत्वाच्च वह्नेस्तदानन्तर्यं महाजपगायत्र्या औचित्यं ॥ १२ ॥

तत्परमात्मायेति । परमात्माय परमात्मने सकलजीवाधिष्ठानाय । वैनतेयाय विशेषेण नतान्नम्रभूतान्परमात्मानं प्रतीति । विनता जगत्सृष्टिकारणमविविद्या तत्संबन्धिने तया नित्यमुक्तायेत्यर्थः । अत एव

जीव ईशो विशुद्धा चित्तेषां भेदः परस्परम् ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

इति वेदान्तरहस्यम् । अत एव ताभ्यां जायमाना सृष्टिजोस्मान् प्रचोदयादिति । परमात्मनश्च जगदधिष्ठानत्वेन सर्वानंतर्यमुचितमिति सर्वशेषतद्गायत्री समाम्नाता ।

मंगलार्थं समाम्नातो व्याख्यातोप्यनुवाकक: ।
आ त्वा वहंतु हरय: पूर्वोसौ शतरुद्रियात् ॥

The rest agrees with this part of the author's Vedadīpa on the Vājasaneyi Saṃhitā. The bracketed sentence is added on the top of the page, the place of omission being marked X. The Mantramahodadhi of Mahīdhara contains at the end the chronogram

विक्रमार्काद्गते वर्षे बाणवेदनृपै (१६४९=A. D. 1588) मिते ।

The author is therefore much later than Sāyaṇa and there is nothing chronologicaly impossible about his reference to the latter.

For this see K. Madhava Krishna Sarma, Adyar Library Bulletin, Vol. IV, Part 4, Manuscripts Notes.

202. 20. O. 26.

THE RUDRAPRAS'NABHĀṢYA (KALPALATĀ) OF AHOBALA

रुद्रप्रश्नभाष्यम् (कल्पलता)—अहोबलकृतम्

Palm-leaf. 27 folia. 15½" X 1½". 9 lines in a page. Grantha character. Old. Heavily damaged. Bad medium hand. Uninked. Complete. In verse.

Begnis: श्रीरुद्रभाष्यं । हरि: ओम् । श्लोकरूपं ।

चेतोभृंगमहेशपादकमलं यद्विष्णुनेत्रार्चितं
तत्वं मौनिमनोमधुव्रतवरव्राताश्र . . . . ।
. . . . . गण्यपुण्यविभवप्राप्यन्ततो दुस्त्यजं
मा मा सन्त्यज मामको यदि तदा तत्रैव नित्यं वस ॥
संसार . . . .
नहोबलमहाकविराजराज: ।
श्रीरुद्रभाष्यतरिमुज्वलपद्यरूपां
चक्रे सदाशिवकृपा . . . . . ॥
. . . . पूजितकालकाल-
श्रीकालकालार्चननीतकाल: ।
श्रीरुद्रभाष्योज्वलचित्तमूलो
जय . . . . ॥
. . बलो भास्करवंशभानु-
श्रीरुद्रमन्त्रार्थविचारदक्ष: ।
श्रीरुद्रभाष्यं तनुते . . .
. . . . भावं ॥
ब्रह्माद्यैरपि रुद्रनाममहिमा न ज्ञायते सर्वथा
रुद्रार्थोपि फणीन्द्रपाणिनिगु . . . . ।
कस्तत्रत्रिमथापि शंकरकृपासंप्राप्तविद्यस्य मे
नाशक्यं हि तत: करोमि शुभदं श्री . . . . . . ॥
. . . . . . कुरुपद्यरूपं
विद्या न विद्या यदि ते तदेति ।
संप्रेरितस्सांबसदाशिवेन
श्रीरुद्रभा . . . . ॥
श्रीरुद्रमन्त्रार्थविचारमात्र-
मन्त्रार्थबोधार्थमहं करोमि ।
अतो मया साधनिकादिकं तथा
न ग्रन्थविस्तारभयेन लिख्यते ॥

Ends:

एवं सर्वमहोबलेन वशिना श्रीरुद्रभाष्यं कृतं
श्रीमत्भास्करव . जेन ललितश्लोकैश्शिवप्रीतये ।
श्रीविश्वे . रदिव्यपादकमलद्वयानप्रणामार्चन-
स्तोत्राराधनचिन्तनादिनिरतस्वान्तेन शुद्धात्मना ॥
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीविश्वेशपदारविन्दनिरतस्वान्तादिसन्तोषता ।
व्याख्या कल्पलता मनोज्ञफलदा संशीलतां सादरं
मत्कृत्यन्तु मया कृतं मम विभो: कृत्यन्तु नात:परं ॥

यन्मे मानसमैशपादकमले भक्त्या मयैवार्प्पितं
सर्वस्वं मम एवमेतदितरं नास्त्येति विजानतः ।
त्र्यक्ष . क्षमनाथनाथकरुणासिद्धो प्रसन्नो भव
हन्त्येनांसि निहन्ति चान्तकभयं हन्त्यापदे वैरिणो ॥
हन्त्यार्तिञ्च तथापकीर्त्तिविकृतिती दैन्यज्ञता दुर्द्धिया
शोभा प्राभववैभवा भव शुभारंभैकभूष्णो प्रभो ।
शंभो शांभवभावभावितभवत्पादारविन्द . .
भवत्पादारविन्दस्मृतिः . . . . ॥
भो शंभो करुणांबोधे त्वत्पादांबुरुहे मम ।
स्वान्तं संवसतु स्वामिन् मया त्वन्यत्र सर्वधा ॥

Colophon : इति श्रीमत्सकललोकप्रसिद्धश्रीमद्भास्करवंशरत्नसंभूतश्रीमन्नृसिंहभट्टमहोपाद्ध्यायहृदयानन्द - सुधाकरकलासंबन्धार्क्केन रामक्कागर्भसंभूतनप्रणमत्सु - रासुरमौलिदिव्यरत्नकोटीरकोटिप्रभापूरपूरितश्रीविश्वेशदि - व्यचरणारविन्दमकरन्दसन्दोहान्दोळितदिव्याञ्चितचञ्च - रीकेणाहोबलेन विरचितं श्लोकरूपं श्रीरुद्रभाष्यं संपूर्णं ॥ श्रीगुरुभ्यो न्मः ॥ देवी रक्षतु मां सदा ॥

महेश त्वद्वारि स्फुरतु रुचिरा वाग्गतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदं मह्यमनिशं
महेशं नाथं मां शरणद सुनाथं कुरु विभो ॥

हरिः ओम् । शुभमस्तु ॥
प्लवंगवर्षे कर्किस्थे रवौ वेंकटसूरिणा ।

The author refers to his another work named Nyāyamahāmaṇi (fol. 3*a*).

203. 9. E. 131.

THE RUDRAPRAS'NAVṚTTIVYĀKHYĀ—ANONYMOUS

रुद्रप्रश्नवृत्तिव्याख्या—अज्ञातकर्तृका

Paper. 75 folia. 11¼" × 5". 10 lines in a page. Devanāgarī script. Recent. In excellent order. Well written in a bold medium hand.

A commentary on Nīlakaṇṭha's commentary on the Rudrapras'na. Fairly elaborate. Author's name does not appear. Apparently incomplete, breaking off in the 10th Anuvāka. Verses from the text, *viz.* Nīlakaṇṭha's Vṛtti are cited. Contains references to Mādhava, Ahobala and Bhaṭṭabhāskara (fol. 3*a*).

Begins : श्रीगणेशाय नमः । ॐ नमः शिवाय । ओन्नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।

अष्टाविंशं गुरुं वंदे सप्तविंशो यदीक्षितः ।
तीर्त्वा षोडश सप्त त्रीनश्नुते नव विंशताम् ॥
श्रीरुद्रोपनिषद्वृत्तिः पद्यैराद्यैरकारि या ।
गंभीरां तां व्याकरोमि विस्पष्टश्रुतियुक्तिभिः ॥
शतकृत्वो वदेत्पथ्यमिति वृद्धानुशासनात् ।
ग्रंथे ऽस्मिन्बालबोधार्थे पुनरुक्तिरक्तिरदूषणं ॥

तत्र भवान् श्रीनीलकंठनामा महायोगी प्रारिप्सितायाः श्रीरुद्रोपनिषद्वृत्तेर्निष्प्रत्यूहपरिपूरणाय प्रचयचकृतं गुर्विष्टदेवतानुसंधानरूपं मंगलं शिष्यशिक्षायै निबन्धप्रेक्षावत्प्रवृत्यंगमभिधेयादि दर्शयितुं चिकीर्षितं सूचयति द्वाभ्यां । तत्रादाविष्टदेवतां भावयन् रुद्राध्यायस्योपनिषत्वं प्रतिपादयंश्चमकानुकानुवाकैरेकवाक्यतां दर्शयति—

चतुतुश्चत्वारिंशाद्गणतविभूते शिवतम
त्वमेवार्के भर्गो भुवि दश दिगीशस्त्वमिति ते ।
महारुद्र व्यूहत्रयमरुमुपासेनति मखै-
र्वशीकर्तुं काक्षे चमकपठितं भूतिविभवं ॥

अत्र श्रीरुद्राध्याये बहुवचनांतनामोपेता गणरुद्रप्रतिपादका मंत्राः । एकवचनांतनामोपेता द्व्यूनशतं मंत्रा

विभूतिरुद्रप्रतिपादकाः । तेषु हरिकेशोभ्यो नमस्तारायेत्यत्र हरिश्च कश्च ईशश्चेति क्रमादकारोकारमकारार्थाः । कृत्स्नप्रणवार्थस्तु तारस्तुर्यमूर्तिः । तत्र पूर्वे शंभुशंकरशिवाः । तारस्तु मयोभुर्मयस्करः शिवतरश्च । त एवं घयोर्वृद्ध्या शतं विभूतिरुद्रा भवंति । शेषाः प्रथमदशमानुवाकस्थास्सप्तविंशतिर्मंत्रा महारुद्रपराः । तस्य मुख्यं रूपं शिवतमं । तत्र मीढुष्टमशिवतमेत्यत्र तत्पदार्थलक्ष्यस्य शिवतमत्वमुक्तं । या त इषुः शिवतमेत्यत्र त्वंपदार्थलक्ष्यस्य । द्वयोः शिवतमयोरसंभवातयोरैक्यं । वक्ष्यति विशल्यो बाणवाढः । उतेति । अत्र बाणवान् रुद्रः । तस्या अग्निरनीकमासीत्सोमः शल्यं विष्णुस्तेजनं वरुणः । पर्णानीति चतुरवयवां रौद्रीमिषुमामनंति । तत्र पतनधर्मित्वाद्वरुणशब्देनाब्बहुलं स्थूलं शरीरं गृह्यते । अग्निस्तैजसं लिंगशरीरं । सोमः शांतप्रकाशमयत्वादस्मितामात्रं धीसत्वं विष्णुश्चिन्मात्रं । स एव सशल्यो जीवः । विशल्यः परमात्मा । तदेतत्तुरीयं चतुश्चत्वारिंशदित्या . मंतत्रयेण दर्शितं ।

The Rudra is divided into three Kāṇḍas :

कांडत्रयात्मकस्य रुद्राध्यायस्य प्रथमः पंचदशार्चऋक्कांडो व्याख्यातः । हिरण्यवर्णादिद्द्वितीयो यजुः कांडः किरिकादिस्तृतीयो मिश्रकांडश्च व्याख्यातव्यौ । तत्राद्ये अध्यारोपापवादौ संक्षिप्योक्तौ । साधनकलापस्तु प्राधान्येन निरूपितः । द्वितीये त्वध्यारोपो विस्तरेण दर्शितः । अपवादसाधने संक्षिप्योक्ते । तृतीयस्त्वपवादपुरस्कारेणैव प्रवृत्तः (fol. 48*b*)

The commentary contains the following statement with regard to Khilas.

नमो रुद्रायाततायिने क्षेत्राणां पतये नम इत्यस्यानंतरं षट् खिल्यजूंष्याम्नायंते । तत्रेदं प्रथमं । नम इंद्र जटाकलापिनां पतये नम इति । खिलं नाम शाखांतरीयमेपेक्षावशात्स्वशाखायां यत्पठ्यते तदुच्यते । यथा ऽर्वाचमिंद्र इति मंत्रः तैत्तिरीयकैः पठ्यमान एव बव संहितायां खिलत्वेन व्यहीयते (fol. 56*b*)

Ends : भेषजीति । सर्वस्मिन्नहनि संसाररोगहर्त्री । निरतिशयत्वात्कालकृतोप्यतिशयो स्यांत संभवतीत्यर्थः । एवमपि विश्वप्रकाशकोपि सूर्यो नक्तंचरान्नानुगृह्णाति । एवमियमपि पापिष्ठान्नानुगृह्णीयादित्यत आह—शिवेति । खलानपि सुखयतीत्यर्थः । सूर्यो हि त्रिगुणात्मत्वान्न सर्वसमः । इयं तु शांतप्रकाशरूपत्वात्सुधांशुवत्सर्वसुखकरीत्यर्थः । अत्रैव हेतुमाह—रुद्रस्य भेषजीति । भिषक्तमं त्वा भिषजां श्रृणोमीति । रुद्रस्य निरतिशयभिषक्त्वं श्रूयते । तेन यथा सद्वैद्यप्रयुक्तं दिव्योषधं कुष्ठक्षैब्यादीन् कर्मजानपि आजानपि आजानसिद्धान् रोगान् समूलमुन्मूलयति । एवमियं भिषक्तमेन प्रयुक्ता काशीदिव्यौषधवत् रजस्तमः प्रकृतीनपि जंतून्संसाररोगान्मोचयत्येवेत्यर्थः । तया नो मडजीवसे इत्यनेन काश्यामेवास्माकं जीवनं भवतु । न तु जीवनार्थं तद्वियोगोस्माकं भवत्वित्यर्थः । २ ।

तया नो मे इत्यने जीवसे इत्येतदेव मंत्रांतरैर्विवृणोतीत्याह—

तया तन्वानोस्मान्मृड मृडयताज्जीवयितुमि-
त्यसावस्यां वस्तुं स्वतनुभरणाय स्पृहयति ।
तदर्थं मंत्राणां विदधति चतुर्णामिह जयं
परे गूढं वासं कति वन चतुर्थाश्रम मपि ॥

अत्र पूर्वार्द्धेनमंत्रांत्यपाद इत्थं व्याख्यातः । तत्र तयेति तृतीयाफलरूपे हेतौ । जीवसे इति व्यंताज्जीवयते स्तुमर्थे असेप्रत्ययः । तथाच अविमुक्ताख्यारुद्रतनुप्राप्तिफलं जीवनं संपादयितुः पशुपुत्रादियुक्तानस्मानन्नवसनारोग्यादिना सुखयेत्यर्थः । दुःवनेन जीवन् हि काश्यां न स्थातुं शक्नोतीति तनूप्राप्तिरूपं फलं विहिदतं भवतीति भावः । तदर्थं निर्विघ्नकाशीवासार्थं इमां रुद्रायेत्यादीनां चतुर्णां मंत्राणां इहास्मिन् ग्रंथे जयं विदधति । तत्तदध्वर्यु-

शाखिन इति शेषः। अन्ये तु संवर्तमैत्रेयादयः निगूढमेव काशीवासं विदधति। तादृशाचारप्रदर्शनेन संवर्तस्यापिति गूढमेव काश्यां वसतः विश्रितः काशीवासो भवदिति आश्वमेधिके पर्वणि महाभारते संवर्तमरुत्तीयोपाख्याने स्पष्टं दृश्यते इति जाबालाः। सर्वविघ्नविनाशार्थं चतुर्थाश्रममेवाविमुक्तसेविना मनंतीत्याकरादेवावगंतव्यं ॥

204. 8. G. 11.

THE TAITTIRĪYABRĀHMAṆA

तैत्तिरीयब्राह्मणम्

Paper. 278 folia (3 Vols.). 10″ × 4″. 9—11 lines in a page. Devanāgarī script. Fairly old. Slightly worn and moth-eaten. Accented in parts.

Vol. 1 : 75 folia ; Kāṇḍa (Aṣṭaka) 1.

At the end :

संवत् १७७२ प्लवंगनामसंवत्सरे उदगयने माघे मासि शुक्लपक्षे प्रतिपदा तिथौ भौमवासरे इदं पुस्तकं आत्मारामेण लिखितं विष्णुभट्टद्रोणस्य।

Vol. 2 : 88 folia ; Kāṇḍa 2.

Date : Same as that of Vol. 1 ; the names of the scribe and former owner omitted.

Vol. 3 : 155 folia ; Kāṇḍa 3 ; Kāṭhaka included.

At the end :

दृशकसंख्या ॥ ७९२ ॥ संवत् १८५९ मिती कार्तिकवदि १० भौमवा।

The same scribe and former owner are mentioned on fol. 1*a*.

All the three volumes are in the same hand. Each volume is foliated separately. The Kāṇḍas are designated as Aṣṭakas in the colophons.

205. 8. J. 54.

Paper. 30 folia. 8″ × 3¼″ 9 lines in a page. Grantha script. Bound in book form. Old, fragile, discoloured and injured. Blurred dirty medium handwriting. Accented.

From Anuvāka 3. 4. 12 to the end of Pras'na 3. 6.

206. 9. C. 69.

Paper. 10 folia. 8″ × 4″. 6—12 lines in a page. Grantha script. Bound in book form. Old and fragile. In the same hand as the last. Accented.

Anuvākas 3. 1. 1—3.

207. 22. L. 44.

Palm-leaf. 84 folia. 17″ × 1¼″. 6—9 lines in a page. Grantha script. Old. Damaged. Well written in two different medium hands. Inked. Unaccented.

Kāṇḍa 3 without Kāṭhaka.

Pras'nas 1—6 foliated consecutively and each of the rest separately.

208. 9. D. 58.

Paper. 137 folia. 8″ × 3¾″. 7—8 lines in a page. Devanāgarī script. Bound in book form. Old. Worm-eaten ; foll. 1—9, 75—94, 98, 99, 113, 114 and 124 missing. Beautifully written in a large bold hand. Accented.

Pras'nas 1—4 and 7—9 of Kāṇḍa 3.

Pras'nas 5 and 6 lost in missing leaves (75—94).

209. 22. A. 41.

Palm-leaf. 26 folia. $18\frac{1}{2}'' \times 1''$. 5 lines in a page. Grantha script. Old. Slightly worm-eaten. Good medium writing. Inked. Unaccented.

Pras'na 3. 7 complete.

210. 22. D. 9.

Palm-leaf. 30 folia. $16'' \times 1\frac{1}{4}''$. 5—6 lines in a page. Grantha script. Old. Damaged; foll. 15, 16, 17 and 31 missing. Fair large writing. Uninked. Unaccented.

Pras'na 3. 8 together with Anuvākas 3. 9. 1—15.

211. 22. L. 32.

Palm-leaf. 130 folia. $16\frac{1}{2}'' \times 1\frac{1}{4}''$. 4—5 lines in a page. Grantha script. Old. In a fairly good condition. Good medium writing. Uninked except Pras'na 3. 1. Unaccented except a few folia.

